वर्षम् – ७१
अङ्कः – १०
श्रावण–भाद्रपदमासौ
विक्रमाब्दः २०७८
युगाब्दः ५१२३
अगस्त, २०२१

ISSN 2249-698X


# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः १५/–
वार्षिक–शुल्कम्
१५०/–
पञ्चवार्षिकशुल्कम्
७००/–
पञ्चदशवार्षिकशुल्कम्
२१००/–

प्रकाशन प्रत्येक माह की 1 तारीख

प्रमोदयन्ति देशस्थान् रक्षाबन्धनपूर्णिमा।
स्वातन्त्र्यदिवसोऽस्माकं कृष्णजन्माष्टमी तथा।।



# विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | नवनीतचौर्यलीला | डॉ. अञ्जना शर्मा | ६ |
| ३ | संस्कृतव्याकरणे उणादिप्रकरणस्य महत्त्वम् | मनीषकुमार शर्मा | ११ |
| ४ | भाषाया आयामाः कौशलानि च | डॉ. परमेशकुमारशर्मा | १३ |
| ५ | सिद्धान्तकौमुदी-मुग्धबोधव्याकरणयोः..... | रोहितकुमार सैनी | १६ |
| ६ | आत्मबोधार्थं मोक्षसाधनवर्णनम् | युगलकिशोरभारद्वाजः | १८ |
| ७ | वैयाकरणसिद्धान्तकौमुद्यां चातुरर्थिकप्रकरणस्य ... | राजवीर पलसानिया | २० |
| ८ | श्री सत्यनारायणाष्टकस्तोत्रम् | पं. नथमलशास्त्री दाधीचः | २१ |
| ९ | श्रीभाष्ये शास्त्रयोनित्वाधिकरणे ईश्वरसिद्धिप्रभावः | मदन सूमरा | २२ |
| १० | पौष्पी-प्रक्रियायाम् अङ्गकार्यविज्ञानम् | शंकरलालशर्मा | २४ |
| ११ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | २६ |
| १२ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | २८ |
| १३ | आयुर्वेद-स्तम्भः | प्रो. बनवारीलालगौडः | ३० |


## पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

**दूरभाषः 0141–2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)**

ISSN2249-698X

।। श्रीशः ।।

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ
स्व. उमाकान्तकेशव आप्टे ( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
श्रीश्यामशरणदेवाचार्यः
( निम्बार्कपीठं सलेमाबादः )
स्वामी रामभद्राचार्यः
( चित्रकूटः )
स्वामी अवधेशानन्दगिरिः
( हरिद्वारम् )
महन्तः गोविन्ददेवगिरिः
( पुणे )
स्वामी राघवाचार्यवेदान्ती
( अग्रपीठं रेवासा )
महन्तः प्रतापपुरी
( तारातरामठं बाडमेरम् )
श्रीदामोदरदासमोदी ( जयपुरम् )

सम्पादकमण्डलम्

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्रोफेसर श्रीकृष्णशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रोफेसर सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

सहायकसम्पादकः
डॉ. स्नेहलता शर्मा

भारतीयसंस्कृतप्रचारसंस्थानम्

अध्यक्षः
प्रोफेसर शङ्करप्रसादशुक्लः

उपाध्यक्षौ
डॉ. नाथूलालसुमनः
डॉ. नन्दसिंहनरूकाः

सचिवः
डॉ. सुधीरकुमारशर्मा

सहसचिवः
कृष्णकुमारशर्मा

व्यवस्थापकः
राजीवदाधीचः
9352030291

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com
वेबसाईट : www.bhartipatrika.org

वर्षम् 71 अङ्कः -10
श्रावण-भाद्रपदमासौ
विक्रमाब्दः 2078
युगाब्दः 5123
अगस्त, 2021

एकस्याः प्रतेः 15/-
वार्षिकशुल्कम् 150/-
पञ्चवार्षिकशुल्कम् 700/-
पञ्चदशवार्षिकशुल्कम् 2100/-

सम्पादकीयम्

# वन्दे भारतमातरम्

...✍ प्रोफेसर श्रीकृष्णशर्मा

१५ अगस्त १९४७ तमे दिवसे भारतवर्षः स्वातन्त्र्यमलभत। ऐषमोऽगस्तमासस्य १५ दिनाङ्कतः स्वतन्त्रताया 'हीरक' जयन्ती (Diamond Jubilee) महोत्सवः समारभ्यते। स्वतन्त्रतायाः प्राप्तये यथा राजनीतिकं दृढनेतृत्वम् आवश्यकम् आसीत् तथैव बौद्धिकनेतृत्वम् अपि महत्त्वपूर्णम् आसीत्। आदौ बंगालप्रान्तस्य **बंकिमचन्द्रचटर्जी**, स्वामी विवेकानन्द, राजनारायण बोस प्रभृतिभिश्च सबलं नेतृत्वं प्रादायि। एषु बंकिमचन्द्रचटर्जी-कवेः क्रान्तदर्शिनो 'वन्दे मातरम्' इति गीतं किञ्चित्कालानन्तरं देशभक्तेरात्मबलिदानस्य च हठादाकर्षकः समुद्घोषो जातः।

बंगसाहित्यकारस्य **बंकिमचन्द्रस्य** जनिर्बंगाल-प्रान्तस्य 'उत्तरी चौबीस परगनान्तर्गत-कण्ठालपाडा (नैहाटी)' वासिनि ब्राह्मणकुले २७ जून १९३८ तमे दिवसेऽभूत्। बंगप्रदेशे आङ्ग्लसाम्राज्यस्य स्थापना-नन्तरम् नवीनाया अर्थव्यवस्थाया कारणात् तत्रत्या भूस्वामिनः कृषीवलाः शिल्पिनश्च प्रायेण अशक्ता अभवन्। १७७० तमे खीस्ताब्दे भीषणोऽकालकालः समागच्छत्। 'ईस्ट इण्डिया कम्पनी' इत्यस्य पदाधिकारिणां निरङ्कुशं शासनम्, समापतिताम् अकालविभीषिकाञ्च जना वैदेशिक-साम्राज्यस्यैव कुप्रबन्धनम् अमन्यन्त। तीर्थस्थानेषु तदानीम् आवागमनस्य प्रतिबन्धकारणात् शङ्कराचार्यस्य **'गिरि'** सम्प्रदायानुयायिनः संन्यासिनः क्षुब्धा अभवन्। अन्यायं प्रतिकुर्वाणाः (प्रतिरोधिनः) सन्यासिनः जनतायाः सहयोगेन कम्पनी-प्रासादेषु कोषेषु च कम्पनी-सैनिकैर्विपरीतं वीरोचितं समाक्रमणं कृतवन्तः। तदानीं 'वारेन हेस्टिंग्ज' सुदीर्घेणाभियानेन विद्रोहमेनम् अदाम्यत्। इमं संन्यासिविद्रोहमालक्ष्यैव 'बंकिमचन्द्र-चटर्जी' महोदयः स्वकीयम् 'आनन्दमठ' इत्युपन्यासम् व्यररचत्, अस्मिन्नेवोपन्यासे **'वन्दे मातरम्'** इति संस्कृत-बंगभाषामिश्रितं राष्ट्रवादप्रतीकात्मकं गीतं समावेशितम्। यद्यपीदं गीतं कविवरेण १८७६ खीष्टाब्द एव रचितमासीत् तथापि १८८२ तम ईशवीयाब्दे 'आनन्दमठ' इत्युपन्यासस्याङ्गभूतं जातम्। संस्कृतगीत-मिदं यद्यपि विस्तृतमस्ति तथापि सार्वजनीनं कण्ठहारायितं प्रथितं पद्यद्वयमित्थमस्ति-

**वन्दे मातरम्**
**सुजलां सुफलां मलयजशीतलाम्,**
**शस्यश्यामलां मातरम् ।। १ ।।**
**शुभ्रज्योत्स्नां पुलकितयामिनीम्**
**फुल्लकुसुमितद्रुमदलशोभिनीम्,**
**सुहासिनीं सुमधुरभाषिणीम्,**
**सुखदां वरदां मातरम् ।। २ ।। वन्दे मातरम् ।**

भारतमातरं प्रणमामि, यस्यां स्वच्छजलमय्यो नद्यः प्रवहन्ति, आस्वादित-मधुरफलोपेता वृक्षाः शोभन्ते, ललितलवङ्गलतापरिशीलन-कोमलशीतलमलयसमीरा वान्ति, हरितानि श्यामलानि शस्यानि प्रफुल्लितानि सन्ति, या च धवलचन्द्रमसः प्रकाशपुञ्जैः प्रमुदिताभी रात्रिभिरानन्ददायिनी, विकचकुसुमचित-वृक्षपुञ्जैः शोभाशालिनी, स्थलपद्मादिहासैः प्रमोदामोदकारिणी, मधुरायां संस्कृतवाचि देववाण्यां वार्तालापप्रसादिनी,

कल्याण-कारिणी, वरदायिनी चास्ति, यथोक्तम्-

**सुवर्णपुष्पं पृथिवीं चिन्वन्ति पुरुषास्त्रयः ।**
**शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम्।।**

इति एतादृशीं गुणगौरवमहिमशालिनीं भारतमातरं वन्दे-प्रणमामीत्याशयः।

१९३७ खीष्टाब्दे 'भारतीय-राष्ट्रिय-काँग्रेस' द्वारा संस्कृतच्छन्दोद्वयनिबद्धम् उपर्युक्तं गीतं 'राष्ट्रियगीत' रूपेण औपचारिकतयाऽङ्गीकृतमासीत्। फलतः भारतवर्षस्य प्रथमो राष्ट्रपतिः **डॉ. राजेन्द्रप्रसादमहोदयः** २४ जनवरी १९५० दिनाङ्के गीतमिदं 'राष्ट्रियगीतम्' इत्येवं संविधानसभायाम् आधिकारिकीम् उद्घोषणां कृतवान्। समुद्घोषयता राष्ट्रपतिमहोदयेनोक्तं यद् भारतवर्षस्य ऐतिहासिके स्वतन्त्रतासंग्रामे '**वन्दे मातरम्**' इति गीतस्य महदवदानमासीद्, अतो यादृशः सम्मानः 'जन-गण-मन-अधिनायक जय हे' इति राष्ट्रगानस्य, तादृश एवास्य 'राष्ट्रगीतस्यापि भवेत्।

राष्ट्रगीतप्रणेतुर्बंकिमचन्द्रस्य १८९४ ईशवीयाब्दे निधनमभवत्। तदनन्तरं भारतीय-राष्ट्रीय-काँग्रेस-अधिवेशने १८९६ ईशवीयाब्दे कवीन्द्रगुरु रवीन्द्रनाथ टैगोरः राष्ट्रगीतमिदं संगीतवान्। १९०६ ईशवीयाब्दे नरेशचन्द्रगुप्तः सर्वप्रथमम् इमम् 'आनन्दमठ' इत्युपन्यासम् आंग्लभाषायाम् अनूदितवान्।

स्वतन्त्रता-संग्रामदिवसेषु राष्ट्रगीतमिदं राष्ट्रभक्तेषु बहुप्रेरणास्पदमभवत् । रामप्रसाद-बिस्मिल्लस्याभिन्नमित्रं स्वतन्त्रता सेनानी '**रोशनलालः**' 'वन्दे मातरम्' इत्येवं गायन्नेव स्वतन्त्रतासंग्रामे स्वप्राणान् तत्याज। ब्रह्म-समाजस्य नेता समाज सुधारकश्च '**विपिनचन्द्रपालः**' (१८५८-१९३२) '**वन्दे मातरम्**' इति नाम्नैव **दैनिकपत्रं** प्राकाशयत्। १६ अक्तूबर, १९०५ दिनाङ्के बंगविभाजनमुद्घोषितमासीत्, तदनन्तरमेव बंगवासिनां-किमन्यत् सम्पूर्णदेशवासिनां स्वतन्त्रताप्राप्तये जनानां कण्ठहार इव 'वन्दे मातरम्' इति समुद्घोषः (Slogan) सञ्जातः। प्रेरणास्पदसाहित्यसर्जको **बंकिमचन्द्रः** १८८६ खिष्टाब्दे '**कृष्णचरित्र**' इत्यस्य प्रथमे भागे श्रीकृष्णचरितं वर्णयामास। श्रीकृष्णः श्रेष्ठो योद्धा, चतुरो नीतिज्ञः, सफलः साम्राज्यनिर्माता चासीद्-इत्येवं रूपेण तस्यां रचनायां श्रीकृष्णं वर्णितवान्। बंकिमचन्द्रस्य स्वप्न आसीद् यद् भारतवर्षे श्रीकृष्ण-सदृशसबलनीतिज्ञपुरुषस्य हस्ते राष्ट्रस्य नेतृत्वं भवेत् तदैव राष्ट्रस्यैक्यं सम्भवम् ।

स्वतन्त्रताया हीरकजयन्त्यवसरे 'वन्दे मातरम्' इति राष्ट्रगीतम्प्रति सविशेषं श्रद्दधाना वयं तत्प्रणेतुः **बंकिमचन्द्र**म्प्रत्यपि हार्दिकीं श्रद्धामर्पयामः ।

**व्याकरणपीठाध्यक्षचरः, जगद्गुरु-रामानन्दाचार्य-**
**राजस्थान-संस्कृत-विश्वविद्यालयः, जयपुरम्**
**दूरभाषाङ्कः 8386943655**

**ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-**

**भारती पत्रिका का वार्षिक शुल्क रुपये 150/-, पंचवर्षीय शुल्क 700/-, आजीवन सदस्यता (15 वर्ष) शुल्क 2100/- मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई-मेल से या डाक द्वारा भिजवा देवें।**

खाते का नाम - **भारतीयसंस्कृतप्रचारसंस्थान**
खाता संख्या - **21391010912498**
**IFS Code - CNRB0002139**

# नवनीतचौर्यलीला

❑ डॉ. अञ्जना शर्मा

**पात्राणि** -

- कृष्णः

- मनसुखा

- श्रीदामा

- सुवलः

- मधुमंगलः

- प्रभावती गोपी

- यशोदा

- एका गोपी

- अपरा गोपी

- अन्या गोपी

(नान्द्यन्ते ततः प्रविशति सूत्रधारः।)

**ललिता शुभदा लीला गोविन्दस्य श्रियेऽस्तु वः।**
**रुता स्मृता स्तुता ध्याता कीर्तिता सेविता मुदा।।**

सूत्रधारः - भगवान् गोविन्दः अत्रोपस्थितानां सर्वेषां कल्याणं करोतु।

नटी - (प्रविश्य) आर्य ! कः प्रयोगोऽद्यानुष्ठेयः? भवान् भगवन्तं गोविन्दं स्मरति, तेन तु प्रतीयते अद्य भगवतो गोविन्दस्य लीला नाटयितव्या।

सूत्रधारः - सत्यं वदसि। अद्य '**नवनीतचौर्यलीला**' नामकम् **एकाङ्करूपकं** नाटयितव्यम्।

नटी - चौर्यलीला........

सूत्रधारः - नवनीतचौर्यलीला मधुरा दिव्यलीला।

नटी - कथम्? कृपया रहस्यमुद्घाटयतु।

सूत्रधारः - भगवान् गोविन्दो गोपीनां गृहे नवनीत-चौर्यलीलां करोति। ता गोप्यस्सामान्या न। तास्तु नित्यसिद्धास्साधनसिद्धा भक्ताश्च गोपीस्वरूपे मनसि भावनां कुर्वन्ति, तदेव गोविन्दस्तासां कामनां पूरयति।

नटी - भगवान् गोविन्दस्तु भक्तवाञ्छाकल्पततरुः। सर्वेश्वरस्सर्वज्ञस्सर्वात्मा च।

सूत्रधारः - बाढम्! यत्किंचिदपि तत्सर्वं गोविन्दस्यैव, यदि कोऽपि जनस्स्वस्य वस्तु गृह्णाति तदा चौर्यं न।

नटी - आर्य! सम्यगाह, अवगतम्। चौर्यलीला दिव्यलीला, न तु प्राकृतलीला।

सूत्रधारः - साधु! किं त्वं गोविन्दस्य स्वरूपं न जानासि।

नटी - किंचित् किंचिद् जानामि।

सूत्रधारः - पूर्णतः तु कोऽपि न ज्ञातुं शक्नोति। त्वं गीतनिःस्वनैः सभामिमां प्रबोधय।

नटी - यथाज्ञापयति भवान् (गायति) (गीतिः)

**करुणाकरं लीलाधरं गोविन्दं भजाम्यहम्।**
**कृपाकरं वंशीधरं गोविन्दं भजाम्यहम्।।**

**नवनीतचौरं गोपीचित्तचौरं मनमानसचौरं गोविन्दं,**
**चीरचौरं चित्तचाञ्चल्यचौरं चौराग्रगण्यं भजाम्यहम्।।**

करुणाकरं लीलाधरं.................... ।।

**ज्ञानिध्येयं योगिगम्यं भक्तलभ्यं गोविन्दं,**
**निर्विशेषरूपं सविशेषस्वरूपं पूर्णात्परं भजाम्यहम्।।**

करुणाकरं लीलाधरं.................... ।।

**सदानन्दं अद्वयतत्त्वं श्रीचैतन्यं गोविन्दं,**
**तापहारिणं प्रणतकामदं भक्तवत्सलं भजाम्यहम्।।**

करुणाकरं लीलाधरं.................... ।।

(गीतावसाने प्रविशति पारिपार्श्विकः।)

पारिपार्श्विकः - भाव ! अपि सज्जितो भवान् ।

सूत्रधारः - किमर्थम्?

पारिपार्श्विकः - अद्य चौर्यमण्डली मन्त्रणां करिष्यति ।

सूत्रधारः -मार्ष ! येषां त्वं चर्चां करोषि । तेऽत्रैवागच्छन्ति ।

पारिपार्श्विकः - चलामः तेषां प्रत्युद्गमनाय ।

सूत्रधारः - एवमेवास्तु, मम मनसि अपि तेषां भावियोजनां ज्ञातुं महती जिज्ञासा, तर्हि चलामः ।

(निष्क्रान्ताः सर्वे)

इति प्रस्तावना

## प्रथमं दृश्यम्

(यमुनापुलिनं वयस्यैस्सह कृष्णः वार्तां करोतिस्म)

कृष्णः - (स्कन्धोपरि हस्तं निधाय) अयि मनसुखाः! त्वं मम मित्रमसि न वा?

मनसुखाः - (साश्चर्यम्) अरे वयस्य! अद्य कोऽयं प्रश्नः? अहन्तु सर्वदैव तव मित्रम् ।

कृष्णः - किन्तु मह्यं दुर्बलं मित्रं न रोचते। त्वमपि मत्सदृशः पुष्टः भवेः ।

(वार्तां श्रुत्वा मनसुखा रोदिति)

मनसुखाः - (रुदन्) अयि वयस्य! त्वन्तु ब्रजाधिपस्य पुत्रोऽसि। तव गृहे गवां कोटेः गोरसः। त्वन्तु प्रतिदिनं नवनीतं खादसि, किन्तु अहन्तु निर्धनब्राह्मणोऽस्मि। मम गृहे दुग्धं न, दधि न, नवनीतस्य तु का कथा। मम माता तु मह्यं यदा- कदा एव तक्रं ददाति। तक्रेण तु अहं कथं पुष्टो भविष्यामि।

कृष्णः - चिन्तां मा कुरु। त्वां नवनीतं खादयाम्यहम् ।

सुबलः - (सहर्षम्) अस्मान् अपि, अस्मान् अपि ।

मनसुखाः - (सशङ्कम्) तव माता प्रतिदिनं नवनीतं कथं दास्यति?

कृष्णः - गृहमानीय न खादयिष्यामि ।

मनसुखाः - (साश्चर्यम्) तर्हि कथम्?

कृष्णः - (सोत्साहम्) विशिष्टमेकं कर्म जानामि ।

श्रीदामा - किम् ?

कृष्णः - स्तेनकर्म ।

मधुमंगलः - (समयेन) स्तेनकर्म अर्थात् चौर्यकर्म। इदन्त्वनुचितम् ।

कृष्णः - (विहस्य) कथम्? शृणु, कस्यापि वस्तुनोऽनिच्छया ग्रहणमेव तु चौर्यम्, किन्तु वदन्तु ब्रजमण्डलमिदं केषाम्?

मधुमंगलः - (सहासम्) अस्माकम्

कृष्णः - सर्वे जनाः केषाम्

मधुमंगलः - अस्माकम्

कृष्णः - सर्वाः गोप्यः केषाम्

मधुमंगलः - अस्माकम्

कृष्णः - सर्वाः गावः केषाम्

मधुमंगलः - अस्माकम्

कृष्णः - गोरसः केषाम्

मधुमंगलः - अस्माकमेव ।

कृष्णः - तर्हि नवनीतं किं परेषां, तत्तु अस्माकमेव। स्वस्य वस्तुनो ग्रहणं चौर्यं कथम्?

मधुमंगलः - सम्यक्

कृष्णः - (सस्मितम्) गोप्यो मामाह्वयन्ति न वा, कथयन्तु?

श्रीदामा - (सहर्षम्) प्रेम्णा आह्वयन्ति ।

कृष्णः - (विहस्य) तासां नवनीतग्रहणं तु प्रेमप्रसादनं, न तु चौर्यम् ।

श्रीदामा - (सशङ्कम्) किन्तु गृहीते ताडनमपि भविष्यति ।

कृष्णः - चिन्तां मा कुरु। मम समीपे एको मन्त्रः। (सर्वेषां कर्णान्तिके मन्त्रं ददाति)

मधुमंगलः - वयस्य ! अस्य मन्त्रस्य कोऽर्थः।

कृष्णः - अर्थेन किम्। अनेनैव रक्षा भविष्यति।

सुबलः - (साश्चर्यम्) वयस्य! त्वन्तु परं बुद्धिमानसि। सम्प्रत्येव त्वमस्माकं नेता नियुक्तः, कृष्णं वन्दे जगद्गुरुम्।

मधुमंगलः - जयतु

श्रीदामा - जयतु

मनसुखाः - जयतु

मनसुखाः - (सौत्सुक्यम्) चौर्यकर्मण्यस्मिन् अस्माभिः किमपि कर्त्तव्यम्।

कृष्णः - अवश्यमेव, युष्माभिः एतावती एव सूचना प्रतिदिनं दातव्या यत् का गोपी कदा बहिर्गच्छति।

श्रीदामा - (सहर्षम्) अयि वयस्य! **प्रभावती** मध्याह्ने बहिर्गच्छति।

कृष्णः - (हसन्) अहा! श्वः प्रभावत्याः गृहं चलिष्यामः।

(सर्वे जयघोषं कुर्वन्ति।)

(यवनिकापातः।)

## द्वितीयं दृश्यम्

(यशोदा दधिमन्थनं करोति स्म। गोपीभिस्सह प्रभावती आयाति)

प्रभावती - (उच्चैः स्वरेण) अयि! यशोदे! यशोदे !

यशोदा - (बहिरायाति, विलोक्य साश्चर्यम्) नैका गोप्यः आगतवत्यः, किं जातम्?

एका गोपी - (मृषा क्रुध्यन्ती) अयि सुशोभे! स्वपुत्रं शिक्ष।

यशोदा - (साक्रोशम्) किं कृतं मम पुत्रेण?

अपरा गोपी - (सव्यङ्ग्यम्) किं किं न करोति तव पुत्रः। प्रतीयते स तु कर्तुमकर्तुं सर्वसमर्थः।

अन्या गोपी - स वत्सान्, मुञ्चति।

यशोदा - खल्वत्र को नु दोषः? स वत्सपालः।

अन्या गोपी - असमये अदोहनकाले वत्सान् मुञ्चति।

यशोदा - भामिनि! क्रोशनं किमिव कुरुषे?

अन्या गोपी - क्रोशे हसति प्रत्युत सोऽयम्। हासमोहिता कापि नेमं वर्जयति। मुखचन्द्रमस्य दृष्ट्वा सर्वं विस्मरामः।

यशोदा - (सस्मितम्) किमर्थं तं पश्यन्ति?

अन्या गोपी - (सस्मितम्) अयि धन्या सैव, नयने तस्याः एव नयने च या तं मोहनं पश्यति।

यशोदा - (सविमर्शम्) केनापि उपायेन वशमानय!

अपरा गोपी - (सवितर्कम्) तं वशीकर्तुं खण्डलड्डुकादिकं मोदकादिकं दद्मः तु कथयति मह्यं न रोचते। वयं जानीमः यदस्मै नवनीतं रोचते। नवनीतं दद्मः तु न भुङ्क्ते, स्तेयमेवात्ति। स्तेनकर्मैवास्य इष्टम्, अतश्चोरितमेवास्मै रोचते, न तु दत्तम्।

यशोदा - (साश्चर्यम्) स तु बालकः।

एका गोपी-(सप्रणयम्) बालस्सन् **सर्वं हरति, हरिस्सः**।

यशोदा - (सविमर्शम्) तम् उच्च**शिक्य**वर्तिषु भाण्डेषु गोरसं स्थापय, हस्ताग्राह्ये न ग्रहीष्यति।

एका गोपी - (हसन्ती) अयि! तव सरलता तु वन्दनीया। स्तेयोपाये गुरुरयम्। नैकान् उपायान् रचयति।

यशोदा - (सोत्कण्ठम्) कथम्?

एका गोपी - (सनाट्यम्) पीठोपरि पीठं विरचयति, तदुपरि समारोप्य चरणौ समुद्बाहुरुच्चशिक्याद् दधि नवनीतं च हरति।

अन्या गोपी - उलूखलमधोमुखं प्रतिष्ठाप्य तदुपरि गोपान् स्थाप्यारोहति।

अपरा गोपी - उलूखलारोहणेन ग्रहीतुमशक्यं बालस्कन्धारोहणेन क्षीररसं गृह्णाति।

एका गोपी - यदि येन-केनोपायेन प्रांशुना शिक्यसंस्थितं गोरसभाण्डमलभ्यं दण्डेन ताडयति। भग्नभाण्डात् सर्वगव्यं भूमौ क्षिपति।

यशोदा - (सविस्मयं विचिन्त्य) अत्युच्चशिक्यस्थेषु भाण्डेषु गोरसं स्थापय।

अपरा गोपी - (हसन्) अतितुंगशिक्यस्थेषु भाण्डेषु सशल्याग्रलगुडेन छिद्रं रचयति, छिद्रं कर्तुं छिद्रेण धारां पातयितुं तथा स्वमित्राणां स्वस्य चास्यं व्यादत्ते।

एका गोपी - (सव्यथम्) स्वयमेवायं न भुङ्क्ते। अनेन सह सर्वे मर्कटाः भुञ्जते। स्वभोजनात् पूर्वमेव मर्कटेभ्यः सर्वेभ्यः विभज्य ददाति। किञ्च तेषां वनफलादितृप्तत्वेन यद्येकोऽपि नात्ति, तर्हि स्वयमपि नात्ति भाण्डं च भिन्नति।

अन्या गोपी - आश्चर्यमिदं रिक्तभाण्डेषु तु प्रयत्नं न करोति।

यशोदा - बहुषु भाण्डेषु सत्सु निजाभीष्टं कथं प्राप्नुयात्?

अपरा गोपी - अत्र हेतुः अन्तर्निहितवयुनमस्य। अतिचतुरोऽयम्।

**प्रभावती** - (सप्रणयम्) ब्रजाधीशस्य पुत्रोऽयं भूत्वा स्तेयं समाचरेत्, नोचितम्। नाहं वदामि अनेन बालेन स्तेयं कुत्रापि शिक्षितं किन्तु त्वं स्वपुत्राय शिक्षां न ददासि?

यशोदा - (सोद्वेगम्, सदैन्यम्) सखि! गवां कोटिर्गृहे मेऽस्ति। गोरसैरार्द्रिताचला। न जाने सोऽत्र कदाचन नात्ति। अनेन मुषितं गव्यं तत्समं त्वं मे गृहाण।

प्रभावती - हे सुशोभे! गोरस आवयोर्भेदरहितः, त्वत्प्रसादाच्च मेऽभवत्। ते शिशोर्मे शिशोर्भेदो नास्ति किञ्चित्, परन्तु स्तेयं त्वनुचितम्।

यशोदा - (सवितर्कम्) त्वं यदा नवनीतमुखं मे बालम् आनयिष्यसि, तदा शिक्षां करिष्यामि, भर्त्सनं बन्धनं चापि।

प्रभावती - (सहर्षम्) तव समीपे आनयिष्याम्यहम् तम्।

(यवनिकापातः)

## तृतीयं दृश्यम्

(प्रभावत्याः गृहम्। अत्युच्चशिक्यस्थम् भाण्डम्। वयस्यैस्सह कृष्णः आयाति।)

मधुमंगलः - (अत्युच्चशिक्यस्थं पश्यन्) वयस्य! ह्य अनया गोप्या तव ग्रहणं सुनिश्चितम्, तदर्थं अद्य तु हिमालयोपरि भाण्डं स्थापितम्। अद्य क्षीररसं कथं प्राप्नुयाम?

कृष्णः - (सोत्साहम्) नोत्तमजनाः विघ्नभयेन परित्यजन्ति कार्यम्। प्रयत्नेन सिद्धिर्भवति।

मनसुखाः - अत्र कः प्रयत्नः?

कृष्णः - अत्र तु प्रतीयते स्कन्धसाहाय्येन हस्ताग्रहो भवेत्। (स्कन्धोपरि चरणौ समारोप्य स्कन्धेष्वारुह्य कृष्णशिक्यस्थभाण्डात् क्षीररसं हरति। मर्कटेभ्यो वयस्येभ्यश्च ददाति। यथा हि क्षीररसं हरन् स्वयमेवात्ति शिक्यस्य दोलायमानेन पृष्ठभागे शिक्यिता घंटी ध्वनति। सर्वे चकिताः भयग्रस्ताः जाताः। असन्तुलनात् एकस्योपरि एकः पतति कृष्णोऽपि च। सर्वे धावन्ति। घंटीनादं श्रुत्वा तत्क्षणं प्रभावती आयाति। धावितुमिच्छन्तं कृष्णं गृह्णाति च।)

प्रभावती- (साभिमानम्) अद्य त्वां तव मातुः समक्षं नेष्यामि। तव नवनीतमुखं दृष्ट्वा सा ज्ञास्यति।

कृष्णः - (सदैन्यम्) मैवम् कुरु। माता दण्डं प्रदास्यति मह्यम्।

प्रभावती - दण्डाद् भयं किम्? त्वन्तु अभयदः।

कृष्णः - (कृताञ्जलिः) नमाम्यहम्।

प्रभावती - न, न।

(कृष्णेऽनागते सर्वे वयस्यास्तत्रैव आयान्ति। प्रभावत्या कृष्णग्रहणं दृष्ट्वा शोकसन्तप्ताः सन् प्रार्थयन्ति।)

सुबलः - (सविनयम्) कृपया मुञ्च सुहृदमस्माकम्। तव गृहं पुनर्नागमिष्यामः। कर्मण्यस्मिन् तु अस्माकमेव दोषः। अस्माकं कृते स एवं करोति।

प्रभावती - न न। अद्य तु अस्य शिक्षा भविष्यति। (कृष्णहस्तं गृहीत्वा प्रभावती स्वगृहाद् निष्क्रम्य बहिरायाति। वयस्याः अनुसरन्ति। तत्र कृष्णग्रहणं श्रुत्वा गोप्योऽपि आगत्य अनुसरन्ति। पथि वृद्धजनान् दृष्ट्वा प्रभावती अवगुण्ठनं करोति। एवं दृष्ट्वा कृष्णो मृदु हसति।)

कृष्णः - (स्मरन्निव) कृपया मां मुञ्च, मुञ्च। पुनर्नागमिष्यामि।

प्रभावती - न, न। शान्तचित्तः चलतु।

कृष्णः - (सनाट्यम्) किन्तु तव दृढबन्धनेन मम हस्ते पीडा जाता।

प्रभावती - हस्तमपरं ददातु। (हस्तयोः परिवर्तने कृष्णेन तस्याः पुत्रस्य हस्तमेव तस्याः हस्ते दत्तम्। तं हस्तं गृहीत्वा सा नन्दभवनम् आयाति। कृष्णः अपरेण मार्गेण नन्दभवनं प्रविशति।

प्रभावती - (तारस्वरेण) अयि यशोदे! पश्य नवनीतमुखं तव पुत्रम्।

यशोदा - (दृष्ट्वा हसन्ती) कुत्रास्ति?

प्रभावती - (स्वहस्तं प्रति संकेतयन्ती) अयमेव।

यशोदा - (हसन्) अवगुण्ठनमपसार्य पश्य मम पुत्रः तव पुत्रो वा।

प्रभावती - (अवगुण्ठनम् अपसारयति, स्वपुत्रं दृष्ट्वा, साश्चर्यम्) अरे त्वं कुतः?

यशोदा - ( सवितर्कम्) अयि मिथ्याभाषिणि! युष्मत्पुत्रकृतं चौर्यमस्मत्पुत्रकृतं कथम्?

प्रभावती - (सदैन्यम्) सत्यं वदामि, मया तु कृष्ण एव गृहीतः।

यशोदा - (सरोषम्) अयि! कृष्णलालसया त्वं स्वपुत्रमपि न पश्यसि। मैवं निरपराधो मम बालकः युष्माभिः उपालब्धव्यः।

(तदैव कृष्णः आयाति।)

कृष्णः - (प्रविश्य) अम्ब! विचित्रा अनुरागगतिः, तत्र तु उपालम्भनमपि। अतः मा रुषा। एतासां बालकेषु मे स्वभावभाववत्ता, तेन एतासां गृहे सत्यमेव मया गम्यते।

यशोदा - (लालयन्ती) मा इतः परं गन्तव्यम्।

कृष्णः - (सविनयम्) यथाज्ञापयति।

प्रभावती - (सविस्मयम्) अयि सुशोभे। आश्चर्यमियम् अस्य वाक्पूर्त्तिः। वस्तुत आवयोः पुत्रयोर्भेदो नास्ति। किन्तु निश्चितमेवायं चौर्यनिष्पादनीं मोहनीं विद्यां जानाति।

(सर्वे हसन्ति। वयस्याः जयघोषं कुर्वन्ति।)

(भरतवाक्यम्)

**चौर्यलीला सुकीर्तिता गोविन्दस्य श्रियेऽस्तु वः।**
**नवनीतमधिकृत्य चित्तं तापत्रयं परम्।।**

(निष्क्रान्ताः सर्वे।)

[नवनीतचौर्यलीला समाप्ता]

**एसोशियेट प्रोफेसर,**
**1, गार्गी निवास,**
**वनस्थली विद्यापीठ-304022 (राज.)**

# संस्कृतव्याकरणे उणादिप्रकरणस्य महत्त्वम्

❑ मनीषकुमार शर्मा

संस्कृतभाषायां वेदा निबद्धाः सन्ति। वेदार्थबोधनाय षडङ्गानि आचार्यैः विरचितानि तेषु व्याकरणं मुखस्थानीयं विद्यते[1]। प्राचीनकाले यद्यपि बहूनि व्याकरणान्यासन् तेषु सम्प्रति लौकिकवैदिकोपकारकं व्याकरणं पाणिनीयमेवावशिष्टम्। पाणिनिना अष्टाध्यायी सूत्रेषु निबद्धा अस्ति। अस्यां प्रयोगानुकूलप्रक्रिया-बोधका ग्रन्थाः विरचिताः सन्ति तेषु सिद्धान्तकौमुदी सर्वातिशायिनी। सिद्धान्तकौमुद्यां प्रायः अष्टाध्याय्याः सर्वाणि सूत्राणि व्याख्यातानि सन्ति। सिद्धान्तकौमुद्या मूलपाठानुसारम् 3879 सूत्राणि व्याख्यातानि सन्ति।

उणादिसूत्राणां प्रथमः प्रवक्ता कः? इति विषये विद्वत्सु नास्ति मतैक्यम्। केषाञ्चिन्मतम् यत् अव्युत्पन्न, शब्दानां व्युत्पत्तिबोधनार्थं पाणिनिना उणादिसूत्राणि विरचितानि यद्येवं न स्यात् धातोः, प्रत्ययः, परश्च, आद्युदात्तश्च, अनुदात्तौ सुप्पितौ इत्यादीनां सूत्राणाम् उत्तरसूत्रेषु अधिकार एव न स्यात्। अष्टाध्याय्यां **उणादयो बहुलम्**[2] सूत्रं पठितम्। अस्मात् सूत्रात् ''उणादयः'' इति पदस्यानुवृत्ति उत्तरयोः द्वयोः सूत्रयोः भवति (भूतेऽपि दृश्यन्ते 3/3/2, भविष्यति गम्यादयः 3/3/3)। सम्भवतः अव्युत्पन्नशब्दानां कृते शाकटायन-कृतोणादिसूत्राणि वीक्ष्य पाणिनिना अत्र समासेन स्वविचाराः प्रकटीकृताः। तत्र उणादिप्रकरणस्य प्रथमं सूत्रं **विद्यते-कृवापाजिमि-स्वदिसाध्यशूभ्य उण्**[3] अर्थात् डुकृञ् करणे, वा गतिगन्धनयोः, पा पाने, पा रक्षणे, जि अभिभवे, डुमिञ् प्रक्षेपणे, स्वद आस्वादने, साध् संसिद्धौ, अशू व्याप्तौ इत्येतेभ्यः धातुभ्यः उण् प्रत्ययो भवति तेन करोतीति कारुः, वातीति **वायुः**। अत्र **आतो युक् चिण्कृतोः**[4] इत्यनेन सूत्रेण यक्कृते सति सिध्यति। पातीति धातो **पायुः**, जयत्यभिभवति रोगान् **जायुरौषधम्**, मिनोति प्रक्षिपति देहे ऊष्माणमिति **मायुः पित्तम्**, स्वदते रोचते इति **स्वादुः** पटः विशेष्यनिघ्नोऽयं स्वादुफलम् इत्याद्यपि भवति। अश्नुते आशुः शीघ्रम्। साध्नोति परकार्यमिति **साधुः**। 'उणादयो बहुलम्' इति बहुवचनलक्ष्यानुसारेण व्यवस्था भवति। रहत्यागे इत्यस्मात् धातोः उण् प्रत्यये कृते गृहीत्वा चन्द्रं रहति त्यजतीत्यर्थे **राहुः** शब्दो निष्पद्यते। वसति अस्मिन् सर्वम्, सर्वत्र चासौ वसतीति **वासुः** सिध्यति। 'छन्दसीणः' अत्र उणित्यनुवर्तते। इण् गतौ इत्यस्मात् धातोः छन्दसि उण् भवति। एति गच्छति इत्यस्मिन् अर्थे **आयुरिति** सिध्यति। 'दॄसनिजनिचरिचटिभ्यो ञुण्' इत्यनेन सूत्रेण दीर्यते इत्यर्थे ञुणि प्रत्यये सति **दारु** सिध्यति। इत्थम् षणु दाने, जन जनने चरगतौ चट भेदने इत्येतेभ्य धातुभ्यः क्रमशः सानुः, प्रस्थः, जानु, चारु रम्यम्, चाटु प्रियं वाक्यं इति शब्दाः सिध्यन्ति। ''सृजेरसुम् च''[5] इत्यनेन सूत्रेण चकारात् सलोपात् असुमागमात् सृजधातोः 'उ' प्रत्यये असुमो मित्त्वादन्त्यादचः परो भवति। सृ अस्ज् इति स्थिते ऋकारस्य यणि, सस्य श्चुत्वेन शः जश्त्वेन जः आदेः सकारस्य लोपे सति उ प्रत्यये रज्जुरिति सिध्यति।

1. पा.शि. 41/42
2. अष्टाध्यायी 3/3/1
3. उणा. 1/1
4. अष्टाध्यायी 7/3/33
5. उणादि 1.15

''**फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च**''[6] इति सूत्रेण फले गुकि फल्गु, पाटे पटिः, पाटयतीति पटुः णम प्रह्वत्वे शब्दे, मन ज्ञाने, जनी प्रादुर्भावे एभ्यः उ प्रत्यये सति मधु, जतु शब्दाः सिध्यन्ति। 'ऊर्णोतेर्नुलोपश्च' इत्यनेन[7] सक्थ्यर्थे ऊरु सिध्यति, महत्यर्थे ''महति ह्रस्वश्च'' इति निर्देशात् उरु महत् इति सिध्यति। श्लिष आलिङ्गने इत्यस्मात् धातोः ''श्लिषेः कश्च'' इत्यनेन सूत्रेण कु प्रत्यये कश्चान्तादेशे श्लिकुः सिध्यति, अस्यार्थो विद्यते भृत्यः। ततः परम् आखुः पशुः इत्यनयोः शब्दयोः व्युत्पत्तिः प्रकरणे बोधिता। तत्रोक्तम् ''आङ्परयोः खनिशॄभ्यां डिच्च'' इत्यनेन सूत्रेण आङ्पराभ्यां खनु अवदारणे शॄ हिंसायाम् कु प्रत्यये आखनतीति भूमिम् इत्यर्थे आङ्पूर्वकात् खनुधातोः कु प्रत्यये डित्त्वाट्टिलोपे **आखुरिति** सिध्यति। परपूर्वकात् शॄधातोः कु प्रत्यये अनुबन्धलोपे डित्त्वाट्टिलोपे **परशुरिति** सिध्यति। **मकुरदर्दुरौ-मकि** मण्डने निपातनात् उरच् उपधाया बाहुलकात् उत्त्वे मकुरो सिध्यति, अस्यार्थो दर्पणः। दर्दुरः-दॄधातोः द्वित्त्वे गुणे अभ्यासस्योरदत्त्वे हलादिशेषे अभ्यासस्य रुकि टिलोपे अरित्यस्यापहारे उरचि दर्दुर इति रूपम् सिध्यति। **दर्दुरः भेक** इत्यर्थः।

कुक्कुरः- कुक आदाने इत्यस्मात् धातो कुकि, उरचि कुक्कुरः सिध्यति। 'कोकतेर्वा कुक्' इत्यनेन कुकागमस्य विकल्पत्वात् कुकुरोऽपि सिध्यति। कुक्कुरः सारमेयः।

पाणिनीयशास्त्रेण सह पञ्चपादी दशपादी च द्वयोः उणादिपाठयोः सम्बन्धः पाणिनीयवैयाकरणैः स्वीकृतः। प्राचीनकाले संस्कृतभाषायाः सर्वे शब्दाः यौगिकाः आसन्। तदानीं कृदन्तप्रकरणान्तर्गतोणादिसूत्राणां परिगणनं भवति स्म, परन्तु उत्तरकाले मानवानां मेधा क्षीणतां प्राप तदा यौगिकशब्देषु कः प्रत्ययः कश्च धातुरित्यस्य ज्ञाने काठिन्यं समनुभूय सहस्रसंख्याकाः शब्दाः अव्युत्पन्ना स्वीकृताः। अस्यामपि अवस्थायाम् शाकटायन-नैरुक्ताचार्याणाम् मते शब्दाः यौगिका एवासन् किन्तु उणादिसूत्राणां परिगणनं पृथग्रूपेण कृतम्। फलतः उणादिसूत्राणि शब्दानुशासनस्य परिशिष्टत्वेन परिगणितानि।

किञ्चिदपि व्याकरणम् बृहच्छब्दराशेः सम्पूर्णशब्दानां संग्राहकं न भवितुमर्हति, अतः शब्दानुशासनानि निदर्शकमात्राणि भवन्ति। यद्यपि सम्प्रति उणादिसूत्राणां संख्या न्यूना अस्ति तथापि रूढशब्दानां प्रकृतिप्रत्ययबोधनिदर्शकानि उणादिसूत्राणीति। ''**उणादयो बहुलम्**'' इत्यत्र ''**बहुलम्**'' पदस्य परिगणनम् एतस्मात् कारणात् कृतं यत् सर्वेषां रूढशब्दानां परिज्ञानं सम्यग्भवेत्। निरुक्ते सर्वेऽपि शब्दाः धातुजाः यौगिकाः कथिताः। अतः येषां शब्दानां प्रकृतिप्रत्ययादीनां परिज्ञानं न स्यात् तेषां धातुप्रत्यया-दीनामूहा करणीया। अर्थात् प्रत्ययं वीक्ष्य प्रकृतिश्चावेक्ष्य प्रत्ययानां संकल्पना कार्या। **महाभाष्यकारेण** उणादिसूत्राणां निदर्शनत्वं बोधयन् महत्त्वं प्रत्यपादयत्-

**बाहुलकं प्रकृतेस्तनुदृष्टेः प्रायसमुच्चयनादपि तेषाम्।**
**कार्यसशेषविधेश्च तदुक्तं नैगमरूढिभवं हि सुसाधु।।**
**नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम्।**
**यन्न विशेषपदार्थसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यम्।**
**संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे।**
**कार्या द्विद्यादनूबन्धम् एतच्छास्त्रमुणादिषु।।**[8]

इत्थं उणादिसूत्राणां संस्कृते महन्महत्त्वं विद्यते। उणादिसूत्राणि रूढशब्दानां निदर्शकानि। येषां ज्ञानं विना व्याकरणस्य ज्ञानमपूर्णमिति दिक्।

6. उणादि 1.18 7. तदेव, 1.30

8. म.भाष्यम् 3/3/01

अनुसन्धाता
श्रीकल्याण-आचार्य-संस्कृतकॉलेजः
सीकरम् (राजस्थानम्)
मो.: 9694323226

# भाषाया आयामाः कौशलानि च

❑ डॉ. परमेशकुमारशर्मा

भाषायाः सुतरां परिज्ञानाय अनेकसोपानानाम् आवश्यकता अनुभूयते। तत्र उच्चारणं, वाचनं, उच्चारणप्रशिक्षणं च, एतदतिरिच्य भाषाकौशलानि अपि भाषाज्ञानाय महत्त्वपूर्णभूमिकां निर्वहन्ति। तदनु एव साधनाधिगमः जायते। आयामाः अर्थात् **साधनानि।** श्रवणम्, उच्चारणम्, महत्त्वं च विभिन्नेन्द्रियाणां सामर्थ्यम्। स्थानप्रयत्नयोः ज्ञानम्। **कौशलानि** श्रवणम् भाषणम्-पठनम् लेखनम्।

**भाषाया आयामाः कौशलानि च**

श्रवणमुच्चारणञ्च-मनसः समञ्जनम् अर्थात् मनः कर्मेन्द्रियैः सम्पृक्तं भवति। श्रवणात् परम् उच्चारणम्। उच्चारणं पदस्तरे करणीयम्। रूपस्तरे पदानाम्। शब्दस्तरे पदानाम् उच्चारणम्। गद्यस्तरे पदानाम् उच्चारणम्। कथास्तरे पदानाम् उच्चारणम्। पुस्तकस्तरे पदानाम् उच्चारणञ्च।

**महत्त्वम्-**

श्रवणेन विषयस्य स्पष्टज्ञानं भविष्यति। भाषायाः व्यवहारः श्रवणं विना भवितुं नार्हति। साधनानि-गुरुमुखं परिवारसदस्याः, आकाशवाणी, दूरवाणी, दूरदर्शनम्, ध्वनिमुद्रणयन्त्रम्, सङ्गणकयन्त्रम्, ध्वनिविस्तारकयन्त्रं च। महत्त्वम् श्रवणेन शब्दानां कल्पनम्। मुखचालना-दिविधीनां श्रवणेन परिज्ञानम्। भाषामाध्यमरूपेण चिन्तने विकासः। पृथक्पृथक्-शब्दानां बोधनसामर्थ्यस्य भाषाबोधनसामर्थ्यस्य च विकासः। श्रवणेन अर्थावगमनसामर्थ्यस्य उत्पादनम्।

**विविधेन्द्रियाणां सामर्थ्यम्-**

शब्दश्रवणेन यावदधिकप्रमाणेन कर्णेन्द्रियस्य पठनेन चक्षुरिन्द्रियशब्दपरिज्ञानसंस्कारो भवति, तद्बलेनैव पौनः-पुन्येन शब्दश्रवणेन छात्राणामिन्द्रियसामर्थ्यं वर्धते।

**स्थानप्रयत्नयोः ज्ञानम्** - छात्राः उच्चारणस्थानानि बाह्यप्रयत्नान् आभ्यन्तरप्रयत्नान् च यथाक्रमं जानन्ति चेद् विषयबोधनम् उच्चारणादिज्ञाने सहजतया छात्राणां जायते। तेषां स्वस्थपरिज्ञानं नूतनवर्णानां वाचनसामर्थ्यं वर्धते। अतः स्थानप्रयत्नज्ञानं महत्त्वपूर्णभूमिकां निवर्हति।

**वाचनं लेखनं च-** वाचनं द्विधा अर्थग्रहणपुरस्सरं वाचनं, यथायोग्यं वाचनं च। दोषपरिहारदृष्ट्या वाचनम्। अर्थग्रहणदृष्ट्या वाचनम्। वाचनेन सम्बन्धज्ञानं भवति। विषयवस्तुनः ज्ञानं वाचनेन भवति। गद्यस्य अर्थावगमनं वाचनेन भवति। वाचनस्य अपरनाम पठनं यद्यपि एतत्पृथग्रूपेण स्वीक्रियते तथापि क्वचित् अपरत्वमपि भजते। वर्णज्ञानं वाचननिमित्तम्। शब्दज्ञानम्। वाक्यानां ज्ञानम्। वाचनस्य महत्त्वं वाचनेन विषयाणां ज्ञानं भवति। वाचनेन अविच्छिन्नानां शब्दानां पठनं भवति। धैर्येण विषयाणाम् उपस्थापनञ्च भवति। वाचनप्रकाराणि लयात्मकवाचनम्। सस्वरवाचनम्। मौनवाचनम्। द्रुतवाचनम्। मन्दवाचनं च।

यावत् छात्रः लय-गति-यति-विरामचिह्नानुसारं पठनं न करिष्यति तावत् तस्य अर्थावगमः न भविष्यति। वाचनाय अर्थज्ञानं वाक्यनिमित्तम् अपेक्षते। विषयदृष्ट्या वाचनस्य प्रकाराः- गद्यम्, पद्यम्, कथा, गीतं च।

**लेखनम्-** लेखनं सम्पादयितुं पूर्वोक्तविषयः अपेक्ष्यते। कश्चन कालः लेखनाय अपेक्ष्यते। वर्णज्ञानम्। मात्राज्ञानम्। वाक्यज्ञानम्। पदज्ञानम्। एतान् सिद्धान्तान् अनुसृत्य लेखनकौशलस्य विकासः जायते। लेखनाय चिन्तनम् उच्चारणञ्च आवश्यकम्। लेखनम्-दृष्ट्वा श्रुत्वा च भवति।लेखने बहुविधाः दोषाः जायन्ते। तत्र हि-उच्चारणगतदोषकारणात् दोषाः भवन्ति। प्रयत्नस्थाना-दीनाम् अज्ञानेनापि दोषाः जायन्ते। नूतनभाषायाः लेखनेऽपि दोषाः जायन्ते।

**लेखनसिद्धान्ताः-**

मात्रा, अनुस्वारः, मकारः, ह्रस्वः, दीर्घः, विसर्गः उष्णः, अल्पप्राणः, महाप्राणः, चकारः, वकारः च

इत्यादयः। तत्र हि लेखनसिद्धान्ताः क्रमेण संक्षेपेण च उपस्थाप्यन्ते यथा-यदि **मात्रा** एका भवति तर्हि ह्रस्वः। यदि मात्राद्वयं भवति तर्हि दीर्घः। यदि मात्रात्रयं भवति तर्हि प्लुतः। यदा मात्रार्धं जायते तदा व्यञ्जनम्। **अनुस्वारः** पाठान्ते मकारः भवेत्। परे अच् तर्हि मकारः। यदि परे हल् अस्ति तर्हि अनुस्वारः। यदा एक मात्रा भवति तदा ह्रस्वः। समासे ह्रस्वः। कालानुगुणं ह्रस्वः। यदा मात्राद्वयं भवति, तदा दीर्घः कालानुगुणं दीर्घः। विसर्गः कखयोरग्रेऽर्धविसर्गः भवति, तस्य नाम जिह्वामूलीयम्।

पफयोरग्रे परेऽर्धविसर्गो भवति तस्य नाम उपध्मानीयं भवति। खरि परे विसर्गस्य सकारः भवति। शरि परे विकल्पेन सकारो भवति। हशि परे उकारः। अप्लुतादकारात्परस्याकारे परे उकारः भवति। एवमन्ये केचन नियमाः लघुसिद्धान्ते परिशीलनीयाः।

**श्रवणस्य ग्रहणशीलता-**

ग्रहणशीलतायै अच्-अल्-वर्णानां मध्ये भेदज्ञानम् आवश्यकम्। आभ्यन्तरबाह्यप्रयत्नयोः ज्ञानम्। अल्प-प्राणमहाप्राणयोः भेदस्पष्टीकरणम्। ऋऌवर्णयोः विलक्षणोच्चारणयोः ज्ञानम्। पञ्चसु वर्गेषु विद्यमानानाम् अनुनासिकाननुनासिकवर्णानाम् उच्चारणभेदप्रदर्शनम्। श, ष, स, ज्ञ इत्येतेषां वर्णानाम् उच्चारणभेदज्ञापनम्। क्ष, ष्ट, श्व, च्च च्छ इत्येतेषां संयुक्ताक्षराणाम् उच्चारणे ध्वनिभेदस्मारणम्। गद्यपद्ययोः पठने भेदज्ञानम्। विविधभाषाप्रभावेण व्यवह्रियमाणानां वर्णानां श्रावणम्। उदात्तानुदात्तस्वरितभेदश्रावणम्। ह्रस्वस्वरितभेदश्रावणं च।

**श्रवणकौशलस्य सम्बन्धोपायः-**

ध्वनिमुद्रणं कृत्वा श्रवणम्। मध्ये आरक्षितशब्दानां श्रवणम्। परस्परभाषणेन श्रवणम्। चलचित्र-दूरदर्शन-आकाशवाणी इत्यादिमाध्यमेन श्रवणम्। उच्चारण-प्रशिक्षणाय भाषाप्रयोगशालायाः महत्त्वपूर्णं स्थानं वर्त्तते।

प्रयोगशालायां वर्ण-अक्षर-शब्द-वाक्यादीनां श्रवणम्। प्रयोगशालायाम् आदौ श्रवणं तदनन्तरम् अभ्यासः। ध्वनिमुद्रणम्-ध्वनिमुद्रणेन श्रवणानन्तरं दोषाणां परिष्कारं कर्तुं शक्नुमः। वैयक्तिकरूपेण सामूहिकरूपेण अभ्यासं कर्तुं शक्नुमः।

**उच्चारणदोषाः**- अनवधानकारणेन अनभ्यास-कारणेन, अज्ञानेन, दोषाः कथं जायन्ते इति विचारणीयम्। तत्र इमानि कारणानि अन्तर्भूतानि दृश्यन्ते, यथा मातृभाषा-प्रभावकारणेन शीघ्रताकारणेन श्रवणाभावे ध्वनिलोपे च दोषाः के जायन्ते? प्रयत्नलाघवम् उच्चारणगतदोषाः, मात्रात्मकदोषाः, स्वरोच्चारणात्मकदोषाः, हलन्तपदानाम-भावगतदोषाः, संयुक्ताक्षरगतदोषाः च। **दोषनिवारणोपायाः**-अभ्यासेन उच्चारणादीनां ज्ञानेन, मातृभाषायाः पृथक्कृत्वा उच्चारणम्, भाषणात् चिन्तनम्, प्रयत्नादि-प्रयोगेण, भाषाप्रयोगशालायां प्रयोगेण च उच्चारण-गतदोषाः न्यूनतां प्राप्नुवन्ति। उच्चारणगतदोषाणां निवारणोपायाः-पौनः पुन्येन शब्दानां श्रवणम्। श्रुतस्य शब्दस्य अनुकरणम्। लेखनानन्तरम् उच्चारणम्। भाषाप्रयोगशालायाः प्रयोगः/भयत्यागः च।

**वाचनकौशलम्**- प्रशिक्षणोपायाः- वर्ण-पद-पदसमुच्चयवाक्-कथाकथनविधीनां सन्दर्भे, सस्वर-वाचनं मौनवाचनं च। वाचनकौशलम्-वाचनकौशलस्य शिक्षणविधयः- वर्णमालाविधिः, शब्दशिक्षणविधिः, वाक्यशिक्षणविधिः च। मौनवाचनम् अर्थावबोधनपूर्वकं समग्रस्य विषयस्य ध्यानेन पठनम्।

**लेखनकौशलम्-**

नियमाः-प्रकाराः-श्रुतलेखनं-दृष्टलेखनं-लेखने दोषनिवारणोपायाश्च।

वाण्या यद् उच्यते तस्य स्थायिरूपेण लेखनम्। लेखनं वर्णरूपेण भवति। ध्वनिरूपस्य लिपिरूपेण परिवर्तनपुरस्सरं लेखनम्। भावानां स्वरूपप्रदानपुरस्सरं लेखनम्। भावस्य लिपिरूपेण प्रतिपादनम्।

**लेखनस्य विकासः -**

स्पष्टं लेखनं भवेत्। सुन्दररूपेण लेखनं स्यात्। सुपाठ्यं भवेत्। स्थायि अवगमनयोग्यञ्च स्यात्। सर्वकालिकं स्यात् यथा महाभारतरामायणादि। नियमाः- शब्देषु रेखास्थापनम्। लेखननियमानां परिपालनम्। शब्दानां समानाकृतिः। लेखन्याः उचितरूपेण ग्रहणम्। चिन्तनानन्तरमेव लेखनम्। एकस्यैव कठिनशब्दस्य बारम्बारं लेखनम् अनुलेखनं वा। विरामादिचिह्नानां समुचितस्थाने स्थापनम्। मात्रादीनां ज्ञानम्। य एतान्

लेखननियमान् परिपालयति सः कविः-रचयिता-उत्तम-लेखकश्च भवितुमर्हति। अस्मिन् त्रयो विषयाः अन्तर्भवन्ति 1. विषयज्ञानम् 2. भाषाज्ञानम् 3. साहित्यज्ञानं च।

**लेखनदोषाणां निवारणोपायाः**

प्रतिवर्णं- प्रतिपदं प्रतिवाक्यम् अवधानम्। मात्रादीनां ज्ञानम्। ह्रस्व-दीर्घ-प्लुतादीनां ज्ञानम्। विषयगाम्भीर्यं विचिन्त्य क्रमेण लेखनम्। कृतदोषस्य निवारणम्। अनुलेखनं-प्रतिलेखनं च मुहुर्मुहुः करणीयम्। नूतनशब्दानां बारम्बारं पठनम्। प्रसिद्धकवीनां ग्रन्थपठने रुचिसम्वर्धनम्। **लेखनस्य प्रकाराः**- लेखनं द्विविधम्- 1. श्रुतलेखनं 2. दृष्टलेखनश्च। श्रुत्वा लेखनं श्रुतलेखनम् उच्चस्तरे भवति। दृष्टलेखनं द्विविधम्-प्रतिलेखनम् अनुलेखनञ्च।

**उपसंहारः**- वर्ण-अक्षर-शब्द-वाक्यादीनां सुस्थिरश्रवणादारभ्य भाषण-पठनकौशलयोः विकास-पूर्वकं, लेखननियमानां परिपालनपुरस्सरं लेखनविकासः महत्त्वपूर्णभूमिकां निर्वहति, यतः भाषायाः चतुर्षु कौशलेषु अन्तिमकौशलरूपेण इदम् अङ्गीक्रियते अतः श्रमोऽपि महान् अपेक्षितः, भाषायाः साहित्यिक-विकासाय अस्य महती आवश्यकता वर्तते तदनुगुणमेव भाषाविकासप्रक्रिया प्रसृता भवति, लेखनं न केवलं छात्रविकासं करोति अपितु सर्वस्याः प्रक्रियायाः अपि विकासाय यतते। तत्र शिक्षकः समाजः साहित्यं च सर्वं क्रमशः अन्तर्भवन्ति। तत्र उच्चारणार्थं पदस्तरे, रूपस्तरे, शब्दस्तरे, गद्यस्तरे, कथास्तरे पुस्तकस्तरे च पदानाम् उच्चारणाभ्यासः नितराम् अपेक्षितो भवति।

**सन्दर्भग्रन्थाः**

1. गायत्री, मुरलीकृष्णः, अध्यापनकौशलोद्दीपिका, जगदीश संस्कृत पुस्तकालय, जयपुर।

2. चौधरी, प्रभादेवी, साहित्यशिक्षणम्, भोपालपरिसर, भोपाल।

3. चौबे, विजयनारायण, संस्कृत शिक्षणविधि, उत्तरप्रदेश हिन्दी संस्थान, लखनऊ

4. झा, उदयशङ्कर, संस्कृतशिक्षणम् (शास्त्रशिक्षण-सहितम्), चौखम्बा सुरभारती प्रकाशन, वाराणसी।

5. पाण्डेय, अरविन्द कुमार, संस्कृत शिक्षा का विकास, आदित्य बुक सेंटर, दिल्ली।

6. पाण्डेय, लक्ष्मीनिवासः, संस्कृतकाव्यशिक्षणम् श्रीलक्ष्मीसरस्वतीप्रकाशन, वाराणसी।

7. पाण्डेय, इन्दिराचरण, संस्कृत शिक्षण समीक्षण, सम्पूर्णानन्दसंस्कृतविश्वविद्यालय,वाराणसी।

8. मित्तल सन्तोष, संस्कृतशिक्षणम्, नवचेतना पब्लिकेशन्स, जयपुर।

9. मिश्र, आजादः, (प्रधानसम्पादक), संस्कृतभाषा-शिक्षणम्, मध्यप्रदेशसंस्कृतबोर्ड, मध्यप्रदेश

10. मिश्र, लोकमान्य, साहित्यशिक्षणविधिः, मृगाक्षी-प्रकाश, 5/113, विरामखण्ड, गोमतीनगर, लखनऊ।

11. रमेशः, वाई. एस., साहित्यशिक्षणविधिः, हंसाप्रकाशन, जयपुर

12. रा., देवनाथः उपाध्याय, बीः, व्याकरणशिक्षण-विधयः, भारतीयविद्या संस्थान, वाराणसी।

13. लता, एन., साहित्यशिक्षणम्, राष्ट्रियसंस्कृत-संस्थानम्, तिरुपति।

14. विश्वासः, कौशलबोधिनी, संस्कृत भारती, दिल्ली।

15. शर्मा, लक्ष्मीनारायण, सिंह, फतेहः, संस्कृतशिक्षणं नवीनप्रविधयश्च, आदित्यप्रकाशन, जयपुर।

16. शास्त्री वासुदेवः, क्रियात्मक संस्कृत शिक्षण, राष्ट्रिय संस्कृत संस्थान, नवदेहली।

17. शुक्लः, रजनीकान्तः, व्याकरणशिक्षणम्, राष्ट्रिय-संस्कृतविद्यापीठ, जयपुर।

18. साम्बशिवमूर्ति, केः, संस्कृतशिक्षणम्, दीपशिखा प्रकाशन, जयपुर।

19. सफाया, रघुनाथः, संस्कृत शिक्षण, हरियाणा ग्रन्थ अकादमी।

20. सिंह, कर्णः, संस्कृत शिक्षण विधि, एच्. पी. भार्गव बुक हाउस, आगरा।

**सहायकाचार्यः, शिक्षासंकायः**
**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
**नवदेहली-16**

# सिद्धान्तकौमुदी-मुग्धबोधव्याकरणयोः बहुव्रीहिसमासविचारः

❑ रोहितकुमार सैनी

व्याकरणं वेदपुरुषस्य मुखं कथितम्, यथा शरीरे मुखस्य प्राधान्यं विद्यते तद्वत् वेदार्थावबोधे व्याकरणस्य महत्त्वं विद्यते। सम्प्रति पाणिनीयव्याकरणस्य अध्ययनाध्यापनं प्रचलितमस्ति। व्याकरणस्य प्रशंसायां श्रीमता भर्तृहरिणाप्रोक्तं यत् व्याकरणं मोक्षमाणानां कृते अजिह्मा राजपद्धतिरिव विद्यते। लोके विद्यमानानां सर्वासां काव्यकोशादिविद्यानां व्याकरणशास्त्रमुपजीव्यं वर्तते, एतावता दुरुच्चारणरूपाणां भैषज्यरूपम् अपवर्गस्य द्वारभूतं व्याकरणं विद्यते। व्याकरणज्ञानात् शब्द-विषयको भ्रमः दूरमेति। मनुष्यः साधुशब्दान् जानाति तदा न केवलं व्यवहारकाले अपितु वेदार्थावबोधेऽपि समर्थो भवति।

सम्प्रति उत्तरभारते नव्यव्यारकणस्याध्यापनं प्रचलति किन्तु **बंगप्रान्ते** मुग्धबोधव्याकरणस्य महत्त्वं विद्यते। **पाणिनीयव्याकरणमकालकं** विद्यते अत्र प्रायः 3995 सूत्राणि सन्ति। सूत्रेषु वार्तिकानि कात्यायनेन विरचितानि। सूत्रवार्तिकेषु महाभाष्यं पतञ्जलिना विरचितम्।

अष्टाध्याय्याः सारल्यार्थं प्रक्रियानुसारिग्रन्थानां संरचना संजाता तत्र रूपावतारप्रक्रियारत्नरूपमाला प्रक्रियाकौमुदी-सिद्धान्तकौमुद्यादिग्रन्थाः विरचिताः। सर्वेषु प्रक्रियाग्रन्थेषु सिद्धान्तकौमुदी सर्वातिशायिनी विद्यते। अस्याः प्रणेतुर्नाम **भट्टोजिदीक्षितो** विद्यते। अस्य पितुर्नाम लक्ष्मीधरः भ्रातुश्च नाम रङ्गोजिभट्ट आसीत्। सिद्धान्त-कौमुद्यां प्रायः सर्वाणि सूत्राणि व्याख्यातानि।

तत्र समसनं **समासः**। प्रायेणान्यपदार्थप्रधानो **बहुव्रीहिः**। बहुव्रीहिसमासस्य चत्वारः भेदाः भवन्ति। प्रथमः समानाधिकरणः, द्वितीयः व्यधिकरणः, तृतीयः तुल्ययोगः, चतुर्थश्च व्यतिहारबहुब्रीहिसमासः। यदा पदेषु समाना विभक्तिर्भवति तदा समानाधिकरणबहुव्रीहिसमासो भवति यथा निर्गतं भयं यस्मात् स निर्गतभयः, अत्र निर्गत सु भय सु इत्युभयोः स्थलयोः प्रथमैकवचनस्य ''सु'' प्रत्ययो विद्यते अतः अत्र समानाधिकरणः बहुब्रीहिरस्ति। यदा विग्रहपदेषु विभक्तिः भिन्ना स्यात् तदा व्यधिकरण-बहुव्रीहिसमासो भवति। यथा धनुष्पाणिः रामः। अत्र धनुः पाणौ यस्य सः धनुः सु पाणि ङि इत्युभयोः स्थलयोः भिन्ना विभक्तिरस्ति।

**तुल्ययोग**शब्दस्यार्थो विद्यते **समानसम्बन्धः** अर्थात् तुल्यः समानः योगः सम्बन्धः। अस्योदाहरणं विद्यते सपुत्रः। विग्रहो विद्यते सह पुत्रेण आगतः। समानसम्बन्धस्य बोधकः ''**सह**'' इति पदं प्रयुक्तं विद्यते। ''**तुल्ययोगः**'' इत्यस्य सूचकं पदं तृतीयान्तेनान्यपदेन सह समस्यमानं भवति। अतः समासोऽयं तुल्ययोगबहुव्रीहि-नाम्ना सम्बोध्यते।

अत्र अन्यसम्बन्धिनीं क्रियामन्यः करोति इतर-सम्बन्धिनीं च इतरः स **कर्मव्यतिहारः**। व्यतिहार-शब्दस्यार्थो विद्यते साध्यसाधनभावे व्यत्यासः अर्थात् **विनिमयः**। अस्योदाहरणं विद्यते-केशाकेशि अस्य विग्रहो विद्यते केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तम्। अत्र विग्रह-वाक्ये सप्तम्यन्तपदयोः प्रयोगो विद्यते। इत्थमेव दण्डादण्डि उदाहरणं बोधितम्। अस्य विग्रहो वर्तते-दण्डैश्च दण्डैश्च प्रहृत्य इदं युद्धं प्रवृत्तम्, अत्र तृतीयान्तपदयोः प्रयोगो जातः।

बहुव्रीहिसमासे वचनलिङ्गसम्बन्धिन्योऽपि विशेषताः सन्ति। समासे आगतेषु शब्देषु किञ्चिदपि वचनमागन्तुमर्हति किन्तु लिङ्गं तदेव भविष्यति यल्लिङ्गं विशेष्यस्य विद्यते। यथा-पीताम्बरः। अत्र विग्रहो भवति-पीतम् अम्बरमस्य, पीते अम्बरे यस्य, पीतानि अम्बराणि अस्य अत्र ''**पीतम्**'' इति पदम् स्वविशेष्यम् ''**अम्बरम्**'' इत्यस्य अनुसरणं करोति किन्तु समासे सति विशेष्यवाचि शब्दानुसारं लिङ्गं भवति। एवमेव पीताम्बरा इत्यादयः शब्दाः सिध्यन्ति।

बहुव्रीहिसमासप्रकरणे सर्वप्रथमं **शेषो बहुव्रीहिः**[1] इति सूत्रं पठितम्। सूत्रमिदमधिकारसूत्रं विद्यते। **तेन सहेति तुल्ययोगे**[2] सूत्रं यावत् बहुव्रीहिसमासो भवति। सूत्रे शेष पदम् अवशिष्टसमाससंज्ञायाः बोधको विद्यते यतो हि उक्तादन्यः शेषः। समासप्रकरणे एतत्पूर्वम् **द्वितीया-श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः**[3] तृतीया तत्कृतार्थेन गुणवचनेन[4], चतुर्थी तदर्थार्थबलिहित-सुखरक्षितैः[5], पञ्चमी भयेन[6], षष्ठी[7], सप्तमी शौण्डैः[8] इत्यादिभिः सूत्रैः विभक्तिनिर्देशपूर्वकं समासस्य निरूपणं कृतं विद्यते किन्तु प्रथमाविभक्तिमुच्चार्य विधानं न कृतम् तद्विधानं बहुव्रीहिसमासेन कृतम्। अत एव **वृत्तिकारेण** वृत्तौ प्रोक्तं यत् 'द्वितीया श्रित' इत्यादिना यस्य त्रिकस्य विशिष्य समासो नोक्तः स शेषः प्रथमान्तम्।

बहुव्रीहिसमासे सर्वप्रथमं समासविधायकं सूत्रं विद्यते "**अनेकमन्यपदार्थे**"[9] अत्र वृत्तौ उक्तं यत् अनेकं प्रथमान्तमन्यपदार्थे वर्तमानं वा समस्यते स बहुव्रीहिः। अप्रथमाविभक्त्यर्थे बहुव्रीहिरिति समानाधिकरणानाम् इत्यर्थो निष्पद्यते। अनेन द्वितीयानिष्ठसमानाधिकरण बहुव्रीहेरुदाहरणं **प्राप्तोदकः**। अस्य विग्रहो विद्यते-प्राप्तम् उदकं यं सः। तृतीयानिष्ठसमानाधिकरणस्योदाहरणं वर्तते ऊढरथः, विग्रहश्च ऊढः रथः येन सः। चतुर्थीनिष्ठ-समानाधिकरणस्योदाहरणमस्ति-उपहृतपशुः, विग्रहश्च उपहृतः पशुः यस्मै। पञ्चमीनिष्ठसमानाधिकरणस्योदाहरणं विद्यते-उद्धृतौदना, विग्रहश्च उद्धृतम् ओदनं यस्मात्। षष्ठीनिष्ठसमानाधिकरणस्योदाहरणमस्ति-पीताम्बरः, विग्रहश्च पीतम् अम्बरम् यस्य सः। सप्तमीनिष्ठ-समानाधिकरणस्योदाहरणमस्ति-वीरपुरुषकः (ग्रामः), विग्रहश्च वीराः पुरुषाः यस्मिन् स ग्रामः। अत्रैव अनेकानि वार्तिकानि पठितानि सन्ति। उपर्युक्तोदाहरणैः स्पष्टतामेति यद् बहुव्रीहिसमासो न भवति प्रथमा-विभक्त्यर्थे। यथा वृष्टे देवे गतः। अत्र बहुव्रीहिसमासो न जातः। यतोहि बहुव्रीहि-समासोऽन्यपदार्थप्रधानो भवति प्रथमाविभक्ति समासनिष्ठा भवति सा चान्यपदम् नास्ति।

एतदतिरिक्तं चतुर्भेदातिरिक्तम् द्वौ भेदौ अन्यौ स्तः। तौ च तद्गुणसंविज्ञानातद्गुणविज्ञानसंज्ञकौ विद्येते। यत्र समासगतपदानामर्थानामाश्रयः अन्यपदार्थे स्यात् तत्र तद्गुणसंविज्ञानबहुव्रीहिर्भवति यथा-**चित्रवाससम् आनय**। अस्य विग्रहो विद्यते चित्रं वासः यस्य तम् आनय तद्गुणसंविज्ञानबहुव्रीहौ "**चित्रवाससम् पुरुषम्**" इत्यस्य बोधो भवति। अतद्गुणसंविज्ञानबहुव्रीहौ स्वस्वामिभावसम्बन्धस्य प्रतीतिर्भवति यथा-चित्रगुम् आनय। बहुव्रीहिसमासप्रकरणे **एकसप्ततिः** सूत्राणि व्याख्यातानि सन्ति। अन्तिमं सूत्रमस्ति-वाहिताग्न्यादिषु वर्तते।

**मुग्धबोधव्याकरणे** यद्यपि बहुव्रीहिसमासस्य विवेचनं सिद्धान्तकौमुदीवत् नास्ति तथापि बालानां कृते महदुपकारि वर्तते। व्याकरणेऽस्मिन् बहुव्रीहिसमासस्य कृते "**हृ**" **संज्ञा** प्रयुक्ता अस्ति। अत्र पीताम्बरं यस्यासौ पीताम्बरो हरिः प्रदत्तमस्ति। अत्रोक्तं यत् तुल्याधिकरण-पदानाम् अन्वर्थत्वे भवति समासोऽयम्। भिन्नाधिकरणा-नान्तु न भवति, यथा-पुत्राय धनमस्य, शिवाय विद्याऽस्य भीत्यर्थे वासोऽस्य अत्र समासो न भवति। अत्र द्वितीयमुदाहरणं दत्तम् अस्ति नीलमुज्ज्वलं वपुर्यस्यासौ **नीलोज्ज्वलवपुः कृष्णः**। अस्य **टीकायां** प्रोक्तं समातृक उदाहरणेन कदाचिद्भिन्नाधिकरणानामपि बहुव्रीहिसमासः स्यात् यथा धर्मे वृत्तिः यस्यासौ धर्मवृत्तिः, त्रिकाले वृत्तिः यस्य सः त्रिकालवृन्तिः, उरसि लोमांसि यस्य स उरसिलोमा, कण्ठे कालः यस्य स कण्ठेकाल इत्यादीनि उदाहरणानि भिन्नाधिकरणानां प्रदत्तानि सन्ति। पीताम्बर इत्युदाहरणेन बोधितं यत् विशषेणविशेष्ययोः समासे विशेषणमेव पूर्वं भवेत्। अत्र **पञ्चविंशतिः** सूत्राणि बहुव्रीहिसमासबोधकानि सन्ति। उभयोर्ज्ञानम् कल्याणाय भवेदिति दिक्।

**अनुसन्धाता**
**श्रीकल्याण-आचार्य-संस्कृतकॉलेजः**
**सीकरम् ( राजस्थानम् ) मो.: 9950923214**

1. अष्टाध्यायी 2/2/23
2. अष्टाध्यायी 2/2/28
3. अष्टाध्यायी 2/1/24
4. अष्टाध्यायी 2/1/30
5. अष्टाध्यायी 2/1/36
6. अष्टाध्यायी 2/1/37
7. अष्टाध्यायी 2/1/36
8. अष्टाध्यायी 2/1/40
9. अष्टाध्यायी 2/2/24

# आत्मबोधार्थं मोक्षसाधनवर्णनम्

(आद्यशंकराचार्यस्य आत्मबोधग्रन्थे)

(गताङ्कादग्रे)

❑ युगलकिशोरभारद्वाजः

अद्वैत-सिद्धान्तस्य संस्थापकः आद्य-जगद्गुरु-शंकराचार्यः अस्माकं प्रेरणास्रोतोरूपेण संस्थितः। आत्मबोधग्रन्थस्य सहज-सरलहिन्दी-भाषायां लयबद्धं पद्यानुवादं विद्वज्जनानां सम्मुखे संप्रस्तौमि। स एवात्र मूलश्लोकानन्तरं पद्यानुवादमयो निम्नानुसारं प्रस्तुतः-

45 (मूलश्लोकः)

**स्थाणौ पुरुषवद्भ्रान्त्या, कृता ब्रह्मणि जीवता।**
**जीवस्य तात्त्विके रूपे, तस्मिन् दृष्टे निवर्तते।।**

(भावार्थः)

**अहंकार लय होता ज्ञानी का,**
**कर्त्ता भोक्ताभाव मिट जाता है।**
**यथा प्रकाश होते ही स्थाणु से,**
**भ्रान्ति भूत भग जाता है।।**
**वह मैं ही हूं सबमें मैं हूं,**
**सब मुझ में ही यह ज्ञान उदय हो जाता है।**
**गुरु तत्त्व के कृपाप्रभाव से,**
**यह तत्त्व समझ में आता है।।**
**अविद्याकृत भ्रान्ति से ही जीव में,**
**कर्त्ता भोक्तापन आरोपित होता।**
**जीव भावना नहीं ब्रह्म में न ही कर्त्ता**
**भोक्तापन होता।**
**गुरु कृपा से महावाक्य का,**
**ज्ञान उदय जब है होता।**
**अविद्याकृपा अज्ञान नाश से,**
**ज्ञानी में जीवत्व भाव मिट जाता।**
**इतनी कृपा प्रभु की पाकर,**
**पुनः जन्म मरण भी नहीं होता।।**

(विशेष)

**वह मैं ही हूं, सबमें मैं हूं,**
**यह तत्त्व समझ जब आता है।**
**हो कृतकृत्य तत्क्षण वह,**
**प्रभु चरण शरण लय होता है।**
**कुल पवित्र जननी कृतार्थ,**
**जगत् सदा यश गाता है।**
**महिमा ऐसे योगी पुरुष की,**
**देख गुरु सुख पाता है।।**

(46)

**तत्त्व स्वरूपानुभवाद् उत्पन्नं ज्ञानमंजसा।**
**अहं ममेति चाज्ञानं, बाधते दिग्भ्रमादि वत्।।**

(भावार्थः)

**सत् चित् आनंद तत्त्व अनुभूति,**
**लक्ष्यजीव का होता है।**
**ब्रह्म आत्म के ऐक्य ज्ञान से,**
**दृढ़ विश्वास उदय हो जाता है।**
**एकत्व भाव दृढ़ होते ही,**
**अज्ञान भाव मिट जाता है।**
**अनादि अविद्या जन्य सभी,**
**पाप ताप मिट जाता है।**
**बोध भानु के महा प्रकाश से,**
**अज्ञान तिमिर भग जाता है।**
**मैं मेरा अरु जगत् वासना भय,**
**छूं मंतर हो जाता है।**
**ऐसा अभय कृपा बल पाकर,**
**साधक जीवन मुक्त हो जाता है।।**

(47)

सम्यग् विज्ञानवान् योगी, स्वात्मन्येवाखिले स्थितम्।
एकं च सर्वमात्मानमीक्षते ज्ञानचक्षुषा।।

(भावार्थः)

संशय अज्ञान रहित योगी ही,
पूर्ण ज्ञान दृष्टि युत होता है।
दृश्यमान कल्पित प्रपंच से,
मुक्त स्वयं भी होता है।।
निज आत्म स्वरूप में स्थित होकर,
यह जगत् साक्षी हो हाता है।
सब जीव जगत् को ज्ञान दृष्टि से,
ब्रह्म रूप लख पाता है।।

(48)

आत्मैवेदं जगत्सर्वं आत्मनोऽन्यन्न विद्यते।
मृदि यद्वत् घटादीनि, स्वात्मानं सर्वमीक्षते।।

(भावार्थः)

मृत्तिका निर्मित घटकुंभादि,
मृत्तिका ही तो होते हैं।
एक ब्रह्म से निर्मित जग भी,
ब्रह्म रूप ही होता है।।
आत्मतत्त्व से पूर्ण जगत् यह,
आत्मा से भिन्न न होता है।
एक स्पन्दन उसी आत्म का,
सकल आत्म में दिखता है।।
मै हूं सब में, वह भी मुझ में,
सकल आत्म मय लगता है।
खुली दृष्टि से जीव जगत् सब,
आत्म रूप ही दिखता है।।

(49)

जीवन्मुक्तस्तु तद्विद्वान्, पूर्वोपाधिगुणान् त्यजेत्।
सच्चिदानन्दरूपत्वाद्, भवेत् भ्रमरकीटवत्।।

(भावार्थः)

भृंगी कीट निज कीट वृत्ति तज,
भ्रमर रूप हो जाता है।
माया जनित भरम भय तज के,
ज्ञानी चिदानन्द रूप हो जाता है।
देह इन्द्रिय मन बुद्धि अहं तज,
ज्ञानी जीवन्मुक्त रूप हो जाता है।
सर्व उपाधि मुक्त हुवा वह,
ब्रह्मानंद सुख पाता है।।

(50)

तीर्त्वा मोहार्णवं हत्वा, रागद्वेषादिराक्षसान्।
योगी शान्तिसमायुक्तो, ह्यात्मारामो विराजते।।

(भावार्थः)

जीवमात्र में आत्म दृष्टिमय,
ज्ञानी आत्मरमण रत रहता है।
मार राग द्वेषादि राक्षस,
मोहमहार्णव तरता है।।
अन्तःकरण चाप पर वैराग्य बाण से,
राक्षस मार भगाता है।।
तब शान्ति रूप सीता को पा
आत्मा राम कहाता है।
प्रारब्ध-शेष शरीर अयोध्या में,
निवृत्ति सिंहासन पर चढ़ जाता है।।

क्रमानुसार....

पूर्व-अतिरिक्तनिदेशक :
आयुर्वेदविभागः, राजस्थानम्
दूरभाष : 9829410781

# वैयाकरणसिद्धान्तकौमुद्यां चातुरर्थिकप्रकरणस्य वैशिष्ट्यम्

❑ राजवीर पलसानिया

पाणिनीयव्याकरणस्य प्रक्रियाग्रन्थेषु सिद्धान्त-कौमुद्याः विशिष्टं स्थानं विद्यते। अष्टाध्याय्याः सूत्रक्रम-व्यवस्था ग्रन्थानुरूपा नास्ति प्रयोगकारणात् तथापि तस्याः सम्पूर्णं कलेवरं सुरक्षितमस्ति। श्रीमतो भट्टोजिदीक्षितस्य काल एव एतादृशी परम्परा प्रचलिता आसीत् यत् एकस्मिन् स्थल एव प्रयोगस्य ज्ञानं भवेत् एतदर्थं तत्तत्स्थानेषु निर्दिष्टानि सूत्राणि प्रयोगानुरूपम् एकस्मिन् स्थले सङ्कलितानि। अस्याः प्रक्रियाया अभ्युदयो रूपावतारस्य प्रणेतुः धर्मकीर्तेः काल एव संजातः। रूपावतारस्य रचना सरला क्रमानुसारिणी विद्यते किन्तु तत्र सर्वेषां सूत्राणां समावेशो नाभवत्। एषा स्थितिः अन्येषां प्रक्रियाग्रन्थानाम् आसीत्। अस्या न्यूनताया समाप्तिः सिद्धान्तकौमुद्याः रचनया संजाता। सिद्धान्तकौमुद्या रचयिता श्रीमान् भट्टोजिदीक्षितो विद्यते। अस्य पितुर्नाम लक्ष्मीधरः भ्रातुश्च नाम रङ्गोजिभट्ट आसीत्। सिद्धान्तकौमुद्यां तद्धितप्रकरणस्य विशिष्टं स्थानम् विद्यते। शब्दरचनादृष्ट्या तद्धितप्रकरणस्य विशिष्टं स्थानं वर्तते। समस्त पदविधिकार्यमेकार्थीभावे एव भवति। तद्धितप्रत्ययाः प्रातिपदिकेभ्यः भवन्ति। तद्धितप्रकरणेषु चातुरर्थिक-प्रकरणस्य विशिष्टं महत्त्वं विद्यते। अत्र **चतुर्षु अर्थेषु प्रत्ययाः भवन्ति** अत एव सिद्धान्तकौमुद्याः टीकायां प्रोक्तं यत् **चातुरर्थिकान्** प्रत्ययान् वक्तुमुपक्रमते प्रथमार्थस्य बोधकं सूत्रमस्ति **तदस्मिन्नस्तीति देशे तन्नाम्नि**[1] तत् अस्मिन्, अस्ति, इति, देशे, तन्नाम्नि एते पञ्च शब्दाः सूत्रे प्रयुक्ताः सन्ति। तत् इति प्रथमान्तम् अस्मिन् इति सप्तम्यन्तम्, तत्प्रत्ययान्तं नाम यस्य स तन्नाम तस्मिन्। सूत्रेऽस्मिन् तद्धिताः, ङ्याप्प्रातिपदिकात्, प्रत्ययः, परश्च एषां पदानामनुवृत्तिरपि भवति। अनेन अर्थो भवति यत् तस्मिन्नस्ति इत्यर्थे प्रथमोच्चारितात् प्रथमान्तात् प्रत्ययान्तेन प्रकृति-नामके प्रसिद्धे देशे गम्ये अणादयः प्रत्ययाः स्युः। उदाहरणं प्रदत्तम् औदुम्बरो देशः। औदुम्बरः-उदुम्बराः (गूलर इति हिन्दीभाषायाम्) सन्ति अस्मिन् देशे इति लौकिक- विग्रहे उदुम्बर जस् इत्यलौकिकविग्रहे अणि प्रत्यये अनुबन्धलोपे सुब्लुकि आदिवृद्धौ औदुम्बर अ इत्यवस्थायामलोपे प्रातिपदिककार्ये औदुम्बर इति सिध्यति।

द्वितीयार्थस्य बोधकं सूत्रं विद्यते ''**तेन निर्वृत्तम्**''[2] सूत्रेऽस्मिन् पूर्वसूत्रात् देशे तन्नाम्नि इति पदे अनुवर्तेते। 'तेन निर्वृत्तम्' इत्यर्थे तृतीयान्तादणादयः प्रत्ययाः स्युः। निर्वृत्तम् इत्यस्य हिन्द्याम् अर्थो विद्यते ''बसाया गया''। उदाहरणं प्रदत्तम् ''**कौशाम्बी**''। कुशाम्बेन निर्वृत्ता इति लौकिकविग्रहे कुशाम्ब टा इत्यलौकिके कुशाम्बशब्दात् अणि प्रत्यये, सुब्लुकि, आदिवृद्धौ, अलोपे, स्त्रीत्व-विवक्षायां टापि कृते सति कौशाम्बी इति सिध्यति।

तृतीयार्थस्य बोधकं सूत्रं विद्यते।''**तस्य निवासः**''[3] अत्र पदद्वयं विद्यते। तस्य, निवासः। सूत्रेऽस्मिन् देशे तन्नाम्नि, निर्वृत्तम्, तद्धिताः, ङ्याप्प्रातिपदिकात्, प्रत्ययः, परश्च इत्येतेषां पदानां पूर्वसूत्रेभ्योऽनुवृत्तिर्भवति। तेन अर्थो भवति यत् ''**तस्य निवासः**'' इत्यर्थे षष्ठ्यन्तात् अणादयः प्रत्ययाः स्युः। उदाहरणमत्र प्रदत्तम्- शिवीनां निवासो देशः **शैवः**। अत्र शिवीनां निवास इति लौकिकविग्रहे शिवि आम् इत्यलौकिकविग्रहे अण् प्रत्ययेऽनुबन्धलोपे''**तद्धितेष्वचामादेः**''इत्यनेन आदि

1. अष्टाध्यायी 4/2/67 2. अष्टाध्यायी 4/2/68
3. अष्टाध्यायी 4/2/69

वृद्धौ इकारलोपे प्रातिपादिककार्ये सति शैव इति सिध्यति।

चतुर्थार्थस्य बोधकं सूत्रं विद्यते - **अदूरभवश्च**[4]। अत्र पदद्वयम् अदूरभवः। च इति। सूत्रेऽस्मिन् तस्य, देशे, तन्नाम्नि, तद्धिताः, ङ्याप्प्रातिपदिकात्, प्रत्ययः, परश्च इत्येतेषां पदानां पूर्वसूत्रेभ्यः अनुवृत्तिर्भवति। तेन तस्य अदूरभव इत्यर्थे षष्ठ्यन्तात् अणादयः प्रत्ययाः स्युः। उदाहरणन्तु **वैदिशं** प्रदत्तम्। विदिशाया अदूरभवं नगरं वैदिशम् इति लौकिकविग्रहे विदिशा ङस् इत्यलौकिके अणि प्रत्यये आदिवृद्धौ आलोपे विभक्तिकार्ये वैदिशम् इति सिध्यति।

"**अदूरभवश्च**" इत्यस्य सूत्रस्य चकारात् उपर्युक्तानां चतुर्णाम् अर्थानाम् प्रवृत्तिः प्रकरणेऽस्मिन् आगतेषु सम्पूर्णेषु सूत्रेषु भवति। सम्पूर्णे प्रकरणे द्वात्रिंशत् (32) सूत्राणि व्याख्यातानि सन्ति। तेषु ओरञ्, बह्वचः कूपेषु, उदक्च विपाशः, सङ्कलादिभ्यश्च, स्त्रीषु सौवीरसाल्वप्राक्षु, सुवास्त्वादिभ्योऽण्, रोणी, कोपधाच्च, वुञ्छण्कठजिलसेनिरठण्यः[5] जनपदे लुप्, लुपि युक्तवद् व्यक्तिवचने, तदशिष्यं संज्ञाप्रमाणत्वात्, लुब्योगा-प्रख्यानात्, योगप्रमाणे च तदभावेऽदर्शनं स्यात्, प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्, कालोप-सर्जने च तुल्यम्, विशेषणानां चाजातेः, वरणादिभ्यश्च, ठक्छौ च, नद्यां मतुप्, कुमुदनडबेतसेभ्यो ड्मतुप्, नडशादाड्ड्वलच्, शिखाया वलच् उत्करादिभ्यश्छः, नडादीनां कुक् च, बिल्वकादिभ्यश्छस्य लुक् इत्यादीनि सूत्राणि प्रकरणेऽस्मिन् अत्युत्तमं व्याख्यातानि सन्ति। अनेकान्युदाहरणानि भौगोलिकैतिहासिककालविषय-काणि विद्यन्ते यैः भट्टोजिदीक्षितस्य एतद्विषयकं ज्ञानं प्रकटीभवति।

स्वल्पकायत्वात् मुग्धबोधे सिद्धान्तकौमुदीवत् तद्धितप्रकरणानि विभक्तानि न सन्ति केवलमत्र कानिचित् सूत्राण्येव सन्ति चातुरर्थिकप्रकरणस्यात्र विवेचनं नावलोक्यते। उदाहरणद्वारा अन्वेषणं कर्तुं शक्यते।

**अनुसन्धाता**
**श्रीकल्याण-आचार्य-संस्कृतकॉलेजः**
**सीकरम् ( राजस्थानम् )**
**मो.: 9785861080**

4. अष्टाध्यायी 4/2/70 5. अष्टाध्यायी 4/2/80

## श्री सत्यनारायणाष्टकस्तोत्रम्

❑ पं. नथमलशास्त्री दाधीचः

प्राप्यते श्रद्धया सत्यं सर्वं सत्ये प्रतिष्ठितम्।
सत्यनारायणो ध्येयः सत्यधर्मार्थसिद्धये।। 1।।

अजं पुराणं पुरुषोत्तमञ्च नारायणं व्यक्तमनन्तमाद्यम्।
सत्यात्मकं सत्यपराक्रमञ्च श्रीसत्यदेवं शरणं प्रपद्ये।। 2।।

सर्वेश्वरः सर्वजगन्निवासः स्वलीलया यो वितनोति विश्वम्।
परात्परं तं सदसत्स्वरूपं श्रीसत्यदेवं शरणं प्रपद्ये।। 3।।

शंखपाणिं गदापाणिं चक्रपाणिं चतुर्भुजम्।
पद्महस्तञ्च पद्माक्षं सत्यनारायणं भजे।। 4।।

भक्तेष्टं भक्तवश्यञ्च भक्तेच्छाविग्रहं विभुम्।
भक्तकामप्रदं देवं सत्यनारायणं भजे।। 5।।

वासुदेवं दयामूर्तिं श्रीनिवासं स्मिताननम्।
सत्यधर्माश्रयं शान्तं सत्यनारायणं भजे।। 6।।

सत्ये रतिर्गतिः सत्ये सत्ये मे सुस्थिरा मतिः।
मनो मे रमतां सत्ये सत्यनारायणं भजे।। 7।।

गोधूमचूर्णाज्यसिताक्तसक्तु- नैवेद्यरम्भाफलधूपदीपैः।
सुपूजितः स्यात्तुलसीदलैश्च श्रीसत्यदेवो वरदः प्रसन्नः।। 8।।

स्तोत्रेणानेन यः स्तौति सत्यनारायणं प्रभुम्।
वंशवृद्धिर्भवेत्तस्य सर्वसौभाग्यमाप्नुयात्।। 9।।

विप्रो विपन्नः स च साधुवैश्यश्चोल्कामुखस्तुङ्गध्वजो नरेशो।
सर्वे समाराध्य हि सत्यदेवं भुक्त्वा सुखानीह कथावशेषाः।।10।।

श्रद्धां विश्वासमाश्रित्य सत्यनिष्ठो नरो व्रती।
शृणुयात्सत्कथां पुण्यां वाञ्छितं लभते फलम्।।11।।

।। श्रीसत्यनारायणार्पणमस्तु।।

छापर ( चूरू ) मो. 9351226660

# श्रीभाष्ये शास्त्रयोनित्वाधिकरणे ईश्वरसिद्धिप्रभावः

❑ मदन सूमरा

श्रीमद्रामानुजाचार्या यामनाचार्येषु निरतिशयभक्तिम् उदवहन् इति सम्प्रदाये तदीयैतिह्याध्ययने च स्पष्टतया प्रतीयते। आत्मसिद्धौ मङ्गलाचरणात्मकं पद्यं ''**भवतु मम परस्मिन् पुरुषे भक्तिर्भूमा**'' इतिरूपम् अर्थतः, प्रायः शब्दतश्च अनुसरन्तः श्रीभाष्येऽपि-**भवतु मम परस्मिन् शेमुषी भक्तिरूपा**-इति मङ्गलाचरणात्मकं पद्यं निरमासिषुः। इत्थम् एव श्रीवैकुण्ठगद्ये अपि स्तोत्ररत्नगतानि पद्यानि अनुसरन्तः एव भगवन्तं निदध्युः। स्तोत्ररत्ने श्लोकः -

**अचिन्त्यदिव्याद्भुतनित्ययौवन**
**स्वभावलावण्यमयामृतोदधिम्।**
**श्रियः श्रियं भक्तजनैकजीवितं**
**समर्थमापत्-सखमर्थिकल्पकम्।।**[1]

**प्रबुद्धमुग्धाम्बुज चारुलोचनं**
**सविभ्रमभ्रूलतमुज्ज्वलाधरम्।**
**शुचिस्मितं कोमलगण्डमुन्नसं**
**ललाटपर्यन्तविलम्बितालकम्।।**[1] इत्यादयः विद्यन्ते।

अत्र प्रयुक्तानि भगवद्विशेषणानि साक्षात् शब्दशः श्रीवैकुण्ठगद्ये आचार्यैः प्रयुक्तानि। तद्यथा- अचिन्त्य-दिव्याद्भुतनित्ययौवनस्वभावलावण्यमयामृतसागरम्, प्रबुद्धमुग्धाम्बुजचारुलोचनम्, सविभ्रमभ्रूलतम्, उज्ज्वलाधरम् इत्यादि। इत्थमेव श्रीभाष्येऽपि यामुना-चार्यग्रन्थानाम् अनुसरणं भाष्यकृतां स्वाभाविकम्। यामुनाचार्यनिर्देशात् एव भाष्यकृतां भाष्यरचने प्रवृत्तिः इति सम्प्रदायसिद्धम् एव।

1. स्तोत्ररत्नम् 45 1. स्तोत्ररत्नम् 35

अथेदानीं शास्त्रयोनित्वाधिकरणश्रीभाष्ये ईश्वरसिद्धेः अनुसृतिः कथं वर्तते पश्यामः।

ईश्वरसिद्धौ सर्वप्रथममेव मीमांसकैकदेशिनां मतम् अनुसृत्य यामुनाचार्यैः ईश्वरः आक्षिप्तः। तत्र ईश्वरसिद्धौ प्रमाणाभावः बाधकप्रमाणसत्त्वस्य स्थितिरुक्ता। तदुक्तम्, ''**नायं सर्वार्थदर्शनशक्तिसम्पन्नः पुरुषः अभ्युपगमम् अर्हति, अतिपतितसकलसाधकप्रमाण-सम्भावना-भूमित्वात्, स्फुटविविधबाधकत्वाच्च।**''[2] इति।

प्रथमतः प्रत्यक्षाविषयत्वं ईश्वरस्य विकल्प्य दूषितम्। ततः परं च अनुमानस्य सम्भावनां पुरस्कृत्य तत्रापि सामान्यतोदृष्टानुमानं वा विशेषतो दृष्टानुमानं वेति विकल्पमुक्त्वा उभयविकल्पासहत्वं प्रदर्शितम्। अत्र नैयायिकानाम् ईश्वरसाधकानुमानम्-विवादाध्यासितं जगत् एकचेतनाधीनम् अचेतनारब्धत्वात् नीरोगशरीरवत् इत्यनूदितम्। तथा चोक्तम् -

**नन्वेकचेतनाधीनं विवादाध्यासितं जगत्।**
**अचेतनेनारब्धत्वादरोगस्वशरीरवत्।।**[1] इति।

ततश्च कार्यत्वहेतोरपि जगत्कर्त्रनुमानम् अनूदितम्। ततः कर्तुः उपादानोपकरणसम्प्रदानप्रयोजनसंवेदित्वं कुलालदृष्टान्तेन साधितम्। इत्थं नैयायिकमतेन ईश्वरसिद्धिः अनुमानेन भवति इति प्रथमतः साधितम्। तच्च निगमितम्, ''न चामी स्वसमवायिनौ अपि धर्माधर्मौ अवलोकितुमिति तदतिरेकी निखिलभुवननिर्माणनिपुणः अधिकरणसिद्धान्तसमधिगतनिरतिशयसहजसकल-

1. ईश्वरसिद्धिः पृ. 226 1. ईश्वरसिद्धिः पृ. 234

विषयसंविदैश्वर्यशक्त्यतिशय: पुरुषधौरेयक: किमिति न सामान्यतोदृष्टलिङ्गाद् अनुमीयते''[2] इति।

तत: परं पुन: एकचेतनाधीनत्वस्य साध्यस्य विकल्पेन दूषणं कृतम्। कार्यत्वहेतुकानुमाने जीवैरेव सिद्धसाधनता च दूषणार्थम् उक्ता। ततश्च कार्यत्वहेतो: सिद्धसाधनं मह्यादिकर्त्रनुमानस्यापि सिद्धसाधनं, कार्यत्वहेतो: विरुद्धतां च आपाद्य ईश्वरस्य जगत्कर्तृत्वम् अनुपपन्नम् इत्युक्तम्। जगत्स्रष्टु: जीवकर्मानुविधानेन च अस्य स्वतन्त्रता च हीयेत इत्यपि आपादितम्। तदुक्तम्-

**सुखैकतानं जनयेज्जगत्करुणया सृजन्।**
**तत्कर्मानुविधायित्वे हीयेतास्य स्वतन्त्रता।।**[1] इति

इत्थम् ईश्वरस्य जगत्कृर्तत्वं नास्ति इति पूर्वपक्षम् उपन्यस्य तत: क्रमेण क्षित्यादौ कार्यत्वं महत्त्वे सति क्रियावत्त्वाद् इत्यादि हेतुभि: साधयित्वा स्वरूपासिद्धि: परिहृता। ततश्च सकर्तृकत्वानुमाने व्यभिचारसिद्धसाधन-दोषौ उद्धृतौ। अनन्तरं हेतो: विरुद्धत्वमपि समाहितम्। जगत्कर्तु: सशरीरत्वाभावेऽपि उपपत्ति: प्रदर्शिता। इत्थं च ईश्वरे सामान्यतोदृष्टानुमानस्य प्रामाण्यं व्यवस्थापितम्। तत: ईश्वरीयविशेष अनुमानम् उपन्यस्य ईश्वर: साधित:। तत: उपरितन: ग्रन्थभाग: लुप्त:। एतावत्पर्यन्तं तु शास्त्रयोनित्वाधिकरणश्रीभाष्येऽपि इयमेव रीति: आदृता लक्ष्यते। प्रथमत: ईश्वरे प्रमाणाभाव: प्रत्यक्षादिनिरासपूर्वं उक्त:। तत्र नैयायिकमुखेन ईश्वरे सामान्यतोदृष्टस्य अनुमानस्य प्रामाण्यमुक्तम्। सामान्यतोदृष्टानुमानस्य प्रदर्शनेऽपि पक्षसाध्यहेतुनिर्देश: समान: एव। ततश्च पुन: अनुमाने अनेके दोषा: मीमांसकमुखेन ईश्वर-सिद्ध्यनुसारमेव प्रदर्शिता:। अन्ते तु **श्रीभाष्ये** अनुमानस्य दूषितत्वात् शास्त्रस्यैव प्रामाण्यं दर्शितम्। सिद्धौ तु पुन: अनुमानदोषान् उद्धृत्य अनुमानस्य प्रामाण्यं रक्षितम्।

इत्थं यद्यपि यावदुपलब्धे ईश्वरसिद्धिभागे अनुमानेनैव ईश्वरसाधनं दरीदृश्यते। शास्त्रयोनित्वमेव तथापि त्रय्यन्तविदां सम्मतम्। अत्र इदं प्रतिभाति आनुमानिकीम् ईश्वरसिद्धिम् अग्रे निरस्य शास्त्र-प्रमाणकत्वम् अपि समाक्षिप्तं भवेत् मीमांसकमुखेन, यत: आरम्भे एव प्रत्यक्षस्य अनुमानस्य आगमनस्य च ईश्वरे न प्रामाण्यमित्येव पूर्वपक्षीया प्रतिज्ञा उपस्थापिता। तदुपरि च निरुक्तानाम् अनुमानानां शास्त्रप्रमाणानुग्राहक-तर्करूपत्वं स्वीकृत्य ईश्वरस्य शास्त्रैकप्रमाणकत्वं व्यवस्थापितं भवेत्। उक्तं हि आत्मसिद्धौ यामुनाचार्यै: आत्मनोऽपि सिद्धिं शास्त्रेणैव रोचन्ते त्रयीविद: इति-आनुमानिकीम् अपि आत्मसिद्धिम् अश्रद्दधाना: श्रौत्रीम् एव तां श्रोत्रिया: संगिरन्ते इति। श्रीभाष्ये शास्त्रयो-नित्वाधिकरणपूर्वपक्षस्य उपलब्धेश्वरसिद्धिग्रन्थ-संवादित्वात् तत्रत्यस्य सिद्धान्तभागस्यापि ईश्वरसिद्धि-संवादित्वमेव सम्भाव्यते।

**शोधच्छात्र:**
**साहित्यविभागे**
**जगद्गुरु-रामानन्दाचार्य-**
**राजस्थानसंस्कृतविश्वविद्यालय:, जयपुरम्**

2. ईश्वरसिद्धि: पृ. 237 1. ईश्वरसिद्धि: पृ. 245

# पौष्पी-प्रक्रियायाम् अङ्गकार्यविज्ञानम्

❑ शंकरलालशर्मा

पाणिनीयाष्टाध्याय्याम् इत्संज्ञायाः कृते केवलम् अष्ट सूत्राणि सन्ति। तेभ्यः सूत्रेभ्यः पाणिनीयधातु-पाठस्थानां 1930 (1943 धातवः सन्ति, किन्तु 13 धातवः समानाः सन्ति अतः 1930) धातूनाम् इत्संज्ञां कृत्वा वयं शुद्धं धातुं प्राप्नुमः। तत्र नत्व-सत्व-नुमागम-उपधादीर्घविधीन् यथाप्राप्य प्रत्यये कृते सति अस्माभिः किं करणीयं भवति इति विचारः अत्र क्रियते।

वस्तुतः अत्र प्रसङ्ग आगच्छति अङ्गकार्यस्य। तस्मात् शुद्धधातोः अस्माभिः अङ्गकार्यं करणीयं भवति। तन्निमितम् अस्माभिः ज्ञातव्यं भवति यत् अङ्गकार्यं किं भवति?

अपरत्र वयं पश्यामश्चेत् ज्ञानं भवति यत् सिद्धान्तकौमुद्यादिप्रक्रियाग्रन्थेषु पौष्पीप्रक्रियावत् अङ्गकार्यविषये किमपि न उक्तमस्ति। तत्र तु एकस्य धातोः रूपसिद्धिप्रसङ्गे आगतस्य अङ्गकार्यसूत्रस्य कार्यमुक्त्वा एव त्यक्तम्। वस्तुतः भगवता पाणिनिना एवं न इप्सितमासीत्। भगवता पाणिनिना तु धातूनां वर्गनिर्माणं कृत्वा अङ्गकार्येभ्यः सूत्राणि लिखितानि आसन्। किन्तु प्रक्रियाग्रन्थेभ्यः सः क्रमः न आचरितः, अस्मात् कारणात् छात्राः अङ्गकार्यस्य विज्ञानं सम्पूर्णधातुपाठं पठित्वा अपि न जानन्ति।

**दीक्षितपुष्पया** भगवतः पाणिनेः अङ्गकार्यस्य विज्ञानं पाणिनेः ईप्सानुसारं वर्णितं येन छात्रः स्वल्पकाले एव अङ्गकार्यस्य विज्ञानेन विज्ञः भवति। अस्माभिः ज्ञायते यत् **'यस्मात् प्रत्ययविधिस्तदादेः प्रत्ययेऽङ्गम्'** (1.4.13) अर्थात् यस्मात् प्रत्ययो विधीयते धातोर्वा प्रातिपदिकाद्वा तदादिशब्दस्वरूपं प्रत्यये परतोऽङ्गसंज्ञं भवति। अस्मिन् सूत्रे उल्लिखितं वर्तते अङ्गस्य परिभाषा।

पाणिनीयाष्टाध्याय्याम् धातुभ्यः प्रत्ययानन्तरं जायमानानि अङ्गकार्याणि त्रिप्रकारकाणि उक्तानि।

1. केवलं सार्वधातुकप्रत्ययेषु परतः जायमानानि अङ्गकार्याणि।

2. केवलम् आर्धधातुकप्रत्ययेषु परतः जायमानानि अङ्गकार्याणि।

3. सार्वधातुकप्रत्ययेषु परतः जायमानानि अङ्गकार्याणि।

धातुभ्यः प्रत्ययान् संयोज्य कार्यकारणस्य विधिरयमेव अस्ति यत् यथैव कस्यापि अङ्गस्य सम्मुखे कोऽपि प्रत्ययः उपस्थितः भवेत् तथैव प्रथमः प्रश्नः अयमेव भवेत्, यत् सः प्रत्ययः कीदृशः अस्ति? सार्वधातुकः आर्धधातुकः वा? यदि सः सार्वधातुकः अस्ति, चेत् सः पित् सार्वधातुकः अस्ति अथवा अपित् सार्वधातुकः अस्ति? यदि सः पित् सार्वधातुकः अस्ति चेत् पुनः ज्ञातव्यं यत् सः हलादिः पित् सार्वधातुकः अस्ति वा अजादि-पित् सार्वधातुकःअस्ति? यदि स अपित् सार्वधातुकः अस्ति तर्हि पुनः परीक्षणं करणीयं यत् सः अजादि-अपित् सार्वधातुकः अस्ति अथवा हलादि-अपित् सार्वधातुकः अस्ति?

**अयमेव निर्णयः अस्माकं प्रथमकार्यमस्ति।**

यथा - रि+श (अ)/अयम् अजादि-अपित्-सार्वधातुकः प्रत्ययः अस्ति। क्री+श्ना (ना)/अयं हलादि-अपित् सार्वधातुकप्रत्ययः अस्ति। भू+शप् (अ)/अयम् अजादि-पित् सार्वधातुकप्रत्ययः अस्ति। दिव्+श्यन्(य)/अयं हलादि-अपित् सार्वधातुकप्रत्ययः अस्ति। इदं विज्ञाय तस्यैव वर्गस्य अङ्गकार्यं कुर्मः यस्य वर्गस्य सः प्रत्ययः अस्ति। इदमेव अस्य सम्पूर्णकार्यस्य मेरुदण्डः वर्तते।

अङ्गकार्यस्य सम्पूर्णविज्ञानमस्मिन् प्रत्ययाव-बोधे एव आश्रितं वर्तते। अतः अत्रैव प्रत्ययावबोधाय अभ्यासः करणीयः, तदैव अग्रे गन्तव्यम्। यदि वयं प्रत्ययस्य सम्यक् विज्ञानं कुर्मः तदैव अस्माकमङ्गकार्यं

त्रुटिरहितं भविष्यति तथा अस्माकं रूपाणि सम्यक् साधितानि भविष्यन्ति।

प्रत्ययावबोधानन्तरं सम्प्रति अजन्ताङ्गानि इत्थं ज्ञातव्यानि यत् तत् - अकारान्तम् अस्ति, आकारान्तम् अस्ति, इकारान्तम् अस्ति, ईकारान्तम् अस्ति, उकारान्तम् अस्ति, ऊकारान्तम् अस्ति, ऋकारान्तम् अस्ति अथवा एजन्तम् अस्ति।

हलन्ताङ्गानि इत्थं ज्ञातव्यानि यत् स-अनिदित् धातुः अस्ति, सम्प्रसारणी धातुः अस्ति, इदुपध-धातुः अस्ति। उदुपध-धातुः अस्ति अथवा एषु किमपि नास्ति।

इत्थमादौ धातोः अवबोधः करणीयः, अनन्तरं प्रत्ययस्य अवबोधः करणीयः। तदनुसारं निर्णयः करणीयः यत् कथमङ्गकार्यं करणीयम्? अत्रोदाहरणरूपेण वयं एकस्य वर्गस्य अङ्गकार्यं पश्यामः।

**ह्रस्व-अकारान्तः अर्थात् अदन्ताङ्गः+सार्वधातुक-प्रत्ययः।**

अकारान्ताङ्गमेव व्याकरणे 'अदन्त-अङ्गम्' कथ्यते। यदा अदन्त-अङ्गात् परे कोऽपि प्रत्ययः आगच्छेत् तदा ज्ञातव्यम् यत् प्रत्ययः सार्वधातुकः अस्ति वा आर्धधातुकः अस्ति।

यदि अदन्त-अङ्गात् परे आगम्यमानः प्रत्ययः सार्वधातुकः अस्ति तर्हि एतैः सूत्रैः कार्यं करणीयम्-

1. ''अतो गुणे'' - अपदान्तात् अकारात् पररूपं भवति गुणे परतः अर्थात् अ, ए, ओ परे।

यथा-भव+अन्ति/अत्र ''अकः सवर्णे दीर्घः'' सूत्रेण दीर्घ-सन्धिः प्राप्तः अस्ति, किन्तु तं प्रबाध्य पूर्वाकारस्य पररूपं भूत्वा-भव्+अन्ति=भवन्ति निष्पद्यते। इत्थमेव पच+ए अत्र ''वृद्धिरेचि'' सूत्रेण वृद्धिः प्राप्ता अस्ति किन्तु तं प्रबाध्य पूर्वाकारस्य अनेन सूत्रेण पररूपं कृत्वा पच्+ए = 'पचे' एव निष्पद्यते।

2. 'अतो दीर्घो यञि'-यदा अङ्गमदन्तं स्यात् तथा पश्चाद्वर्ती सार्वधातुकप्रत्ययः वकारात् मकारात् वा प्रारम्भः भवेत् तदा अदन्त-अङ्गस्य अन्तिम-अकारः दीर्घः भवति। उदाहरणानि -

नय + मि - नया + मि = नयामि

नय + वः - नया + वः = नयावः

इत्थमेव आकारान्त-अङ्गम्+सार्वधातुक-प्रत्ययः, इकारान्त-अङ्गम् + सार्वधातुकप्रत्ययः एवमेव सर्वेषाम् अङ्गानां विचारः विस्तरेण दीक्षितपुष्पामहोदयया स्वग्रन्थे कृतः वर्तते।

'**वर्णादाङ्गं बलीयः**' इति नियमेन अङ्गकार्य-मादौ भवति, अनन्तरं यथाप्राप्तं सन्धिकार्यं भवति। वस्तुतः पाणिनीयाष्टाध्याय्याम् अङ्गकार्याय सर्वाणि सूत्राणि 6.4.1 तः 7.4.97 पर्यन्तं सन्ति। 'अयमेव अङ्गाधिकारः उच्यते। दीक्षितपुष्पामहोदयया उक्तं यत्-अङ्गकार्यम् एकवारमेव पाठनीयम्, येन छात्रः अङ्गकार्यस्य सर्वं विज्ञानं विज्ञाय निःसंकोचः भूत्वा अग्रे सरेत्। किन्तु प्रक्रियाग्रन्थेषु तु अङ्गकार्यस्य सूत्राणि यथावसरम् अध्याप्यन्ते, येन छात्राणां स्थितिः अस्पष्टा तिष्ठति। ते न जानन्ति यत् कथम् अङ्गकार्यं विधातव्यम्। प्रक्रियाग्रन्थेषु इत्थं अङ्गकार्याणां विभाजनं न कृतम्, नहि तत्र धातूनां वर्गाः निर्मिताः सन्ति। न अङ्गकार्याणि वर्गानुसारं उक्तानि। एतेभ्यः कारणेभ्यः छात्राः वस्तुतः तत्रैव तिङन्तस्याध्ययनं परित्यजन्ति।

किन्तु पौष्पीप्रक्रियायामित्थमङ्गकार्याणां विभाजनं दत्तमस्ति। आदौ तत्र त्रिप्रकारकाणि अङ्गकार्याणि उक्तानि सन्ति। अनन्तरं धातूनां वर्गानुसारं अङ्गकार्यकरणाय सूत्राणि वर्णितानि सन्ति। दीक्षितपुष्पा-महोदयया अङ्गकार्यस्य विज्ञानं स्वग्रन्थे '**प्रक्रियानुसारी पाणिनीयधातुपाठः**' इत्यस्मिन् वर्णितमस्ति। अतः निष्कर्षरूपेण वयं वक्तुं शक्नुमः यत् अनेन क्रमेण कोऽपि अध्ययनं करोति चेत् सः स्वल्पकाले एव पाणिनीयव्याकरणस्य अङ्गकार्यस्य विज्ञाने दक्षः भविष्यति।

**शोधच्छात्रः**

**केन्द्रीयसंस्कृतविश्वविद्यालयः, जयपुरम्**

**प्राध्यापकः ( संस्कृतम् )**

**राज.उ.मा.वि., कोयला, जिला-बारां**

**दूरभाषः 9636655537**

पुस्तकसमीक्षा

# नूतनः काव्यसङ्ग्रहः

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

भारतशासनेन 'पद्मश्री' इत्यलङ्करणेन सभाजितस्य, राष्ट्रपतिसम्मानितस्य, वाराणसेयसंस्कृत-विश्वविद्यालयकुलपतिपदमलङ्कृतवतः कविसार्वभौमस्य विद्वत्प्रवरस्य प्रो. अभिराज-राजेन्द्रमिश्रस्य बहवः संस्कृतकाव्यग्रन्थाः प्रकाशिताः सन्तीति सुविदितं संस्कृतजगति। काव्येष्वेषु प्रमुखतः शार्दूलविक्रीडित-मन्द्राकान्तोपजातिप्रमुखानि संस्कृतच्छन्दांस्येव प्रयुक्तानि तेन। सपद्येव विद्वद्वर्यस्यास्य संस्कृतेतरच्छन्दःसु व्रजभाषाप्रयुक्तेषु कवित्त-सवैयादिषु निबद्धाः संस्कृत-काव्यरचनाः सङ्कलने एकस्मिन् प्रकाशिता इति विज्ञाय प्रमोदेरन् काव्यरसिकाः।

संस्कृते सहस्राब्दीभ्योऽनुष्टुप्-प्रभृतिषु वार्णिक-च्छन्दःसु काव्यरचना क्रियमाणाऽस्ति। वेदेषु त्रिष्टुप् प्रभृतीन्याक्षरिकच्छन्दांसि प्रयुक्तानि दृश्यन्ते। प्राकृतादि-भाषाप्रयुक्तस्य ''गाथा'' ''आर्या'' ख्यस्य मात्रिक-च्छन्दसोऽपि प्रयोगः संस्कृतकविभिरकारि किन्तु शताब्दीभ्यो व्रजभाषादिषु प्रयुक्तानां सर्वथा लोकप्रियाणां छन्दसां दोहा-चौपाई-कवित्त-सवैयादीनां प्रयोगः शीर्षस्थैः संस्कृतकविभिर्नैवाऽक्रियत। एवंविधानां मात्रिकच्छन्दसां भूयसी संख्याऽस्ति हिन्दीसाहित्येति-हासविदिता। तुलसीदासविहारि-रसखान-देव-पद्माकरादिभिः स्वकाव्येषु छन्दसामेषामेव प्रयोगः कृतोऽस्ति शताब्दीभ्यो यः कालजयी परिभाष्यते। एतेषु छन्दःसु विपुलसंस्कृत-काव्य-रचना मत्पितृचरणैः स्व. भट्ट श्रीमथुरानाथशास्त्रिभिः मञ्जुनाथ काव्यनामधारिभि-र्विंश्यां शताब्द्यां कृताऽभूत्। साहित्यवैभव-गोविन्द-वैभवादिकाव्यानामेषां संग्रहो ''मञ्जुनाथग्रन्थावली'' नाम्ना देहलीस्थेन केन्द्रीयसंस्कृतविश्वविद्यालयेन प्रकाशितोऽस्ति। तथ्यमिदं प्रो. अभिराज-राजेन्द्रमिश्रेण स्वकाव्यसंग्रहभूमिकायामुल्लिखितमप्यस्ति यद् भट्ट-महोदयैः प्रयुक्तानामेषां छन्दसां नाऽभूत् प्रामुख्येण प्रयोगः परस्तात् संस्कृतकाव्यजयति किन्तु मिश्रवर्यैरेतेषु छन्दःस्वपि संस्कृतकाव्यरचना व्यधायि यतस्ते हिन्द्यादिभाषास्वपि काव्यानि व्यरचयन्।

प्रो. अभिराज-राजेन्द्रमिश्राणां ''**सप्तवेणी**'' शीर्षकवहे नूतने काव्यसंग्रहेऽस्मिन् ब्रजभाषा-हिन्द्यादिकाव्येषु निबद्धाः संस्कृतकाव्यरचनाः सङ्कलिताः सन्ति। अतस्त्रिवेणी कविवर्येणाऽनेन काव्यसंग्रहस्यास्याऽभिधानं ''सप्तवेणी'' ति विहित-मस्ति। छन्दसामेषां नामान्यपि कविवर्येण संस्कृती-कृतानि। सवैया इत्यस्य नाम **सपादिका**, घनाक्षरी (कठिन) इत्यस्य नाम **घनाक्षरिका**, दोहा इत्यस्य नाम **दोधकम्**, सोरठा इत्यस्य नाम **सौराष्ट्रकम्**, बरवै इत्यस्य नाम वरवृत्तम्, छप्पय इत्यस्य नाम षट्पदम्, कुण्डलिया इत्यस्य नाम च **कुण्डलिका** इत्याख्यातमत्र कविवर्येण। एतेषु छन्दःसु विरचिताः काव्यरचना विविधान् विषयान् स्पृशन्ति। अन्योक्तयः, स्तुतयः, ऋतुवर्णनम्, नीतिकाव्यानि, कविवृत्तम्, लोकवृत्तम् इत्यादयो विषया विनिबद्धाः सन्ति छन्दःस्वेतेषु। छन्दसामेषां सोऽयं विशेषस्तु सुविदित एव यदेतेषु सर्वत्र ''अन्त्यानुप्रासः'' (तुकान्त) अनिवार्यरूपेण प्रयुज्यते। अनेन काव्यस्य रोचकता प्रवर्धत इति तु स्पष्टमेव किन्तु रचनाकारस्य कृते किञ्चन काठिन्यमवश्यमेवोपतिष्ठते। संस्कृतच्छन्दःसु नाऽस्ति तदिदं बन्धनमन्त्यानुप्रासस्य।

सोरठाख्ये छन्दसि तुकान्ताख्योऽनुप्रासश्चरणान्ते न प्रयुज्यते, चरणमध्ये प्रयुज्यते इत्यपि सुविदितम्। यथा काव्यसंग्रहेऽस्मिन् सङ्कलिते वसन्तवर्णने प्रथमं सौराष्ट्रकमेवमस्ति-

**वनभुवि लसति वसन्त उडुपतिरिव नीले नभसि।**
**आवक्ष्यते नु हन्त! विविधसमृद्धिसमृद्ध इह।।**

इत्थं सप्तसु छन्दःसु विनिबद्धाः पञ्चविंशतिकाव्य-रचनाः सङ्कलिताः सन्ति सप्तवेण्याम्। संग्रहस्यास्य प्रधानसम्पादकरूपेण देहलीस्थ-राष्ट्रिय-संस्कृत संस्थानस्य (केन्द्रीय विश्वविद्यालयस्य) कुलपतिवर्याणां प्रो. परमेश्वरनारायणशास्त्रिणां नाम मुखपृष्ठे प्रकाशित-मस्ति। भूमिकायां च काव्यप्रणेतृवर्येण स्पष्टीकृतमस्ति यदेतेषु सानुप्रासेषु मात्रिकच्छन्दःसु काव्यरचना असिधाराव्रतमेवाऽस्ति यतो मात्रा-यति-गतीनामनु-प्रासादीनां चावधानं सुतरामावश्यकमत्र।

सुप्रथितस्य कविवर्यस्य नूतने छन्दःसप्तके विनिबद्धानां काव्यरचनानामयं संग्रहः सर्वविधानां पाठकानां मनांसि प्रसादयिष्यतीति विश्वसिमोऽभि-नन्दामश्च कविसार्वभौमं प्रो. अभिराज राजेन्द्रमिश्रम्।

**सप्तवेणीः कविः प्रो. अभिराज राजेन्द्रमिश्रः प्रकाशक राष्ट्रियसंस्कृतसंस्थानम् 56-57 इन्स्टीट्यूशनल एरिया, जनकपुरी, नई दिल्ली-58, पृ.सं. 116, मू. 165/-**

## नूतनः कथासंग्रहः

वाराणसेयस्य विदुषो डॉ. गायत्रीप्रसादपाण्डेयस्य नूतनः कथासंग्रहः सपद्येव प्रकाशितोऽस्ति ''कथास्तबक'' शीर्षकवहः। अत्र हि चतुर्दश कथाः प्रकाशिताः सन्ति या विविधानि विषयवस्तून्युपहरन्ति विविधान् परिवेशांश्च प्रतिनिदधति। प्रथमा कथा सुप्रथितं सङ्गीतकारं तानसेनमवलम्ब्य निबद्धाऽस्ति यत्र तानसेनस्य मूलनाम ''तनसुख'' इति सूचितमस्ति, अकबरस्य नवरत्नेषु कथमयं नवमं रत्नत्वमापेदे, गुरु-वर्यस्य सुप्रथितसन्तहरिदासस्यानुग्रहमाससाद इत्यादि वर्णितं कथायाम्। अन्याः कथाः प्रायश आधुनिक-कालीनाः सन्ति, परितापः, मशकार्थो धूमः, महालया इत्यादिशीर्षकवहाः कथा आधुनिकसमाज-चित्रणपराः सन्ति।

आधुनिककालीनविश्वविदिता भयातिशयवहा घटनाऽस्ति वैश्विकी महामारी ''कोरोना'' इत्याख्या। तस्याश्चित्रणं यथा विविधासु भाषासु निबद्धे साहित्ये समुपलभ्यते तथैव संस्कृतभाषाऽपि तां वर्णयतीति सुस्पष्टमाधुनिकसंस्कृतलेखने। तदिदं संस्कृतभाषां प्राचीनतमां नवीनतमां च भाषां प्रमाणयति। संस्कृतकाव्यरचनासु कथासु च पठन्त्येव पाठकाः कोरोना (कोविड19) काण्डम्। अस्मिन् कथा-संग्रहेऽपि कथैका कोरोनामुपनिबध्नाति-कोरोना-पराजयः (कोविड 19) अपरा कथा ''गवां गोष्ठी'' मनोरञ्जकं विषयवस्तु वातावरणं च प्रस्तौति। आधुनिककाले गोरक्षणस्य शासकीयव्यवस्थाऽप्यत्र सङ्केतिता, वस्तुस्थितिरपि चित्रिता।

कथाकारस्य पाण्डेयवर्यस्य काव्यरचनानां कथानां च संग्रहाः पूर्वमपि प्रकाशिताः समये समये पुरस्कृताश्चेति सूचना लेखकपरिचये द्रष्टुं शक्यते। आकाशवाणी-प्रसारणस्यापि विपुलोऽनुभवोऽत्र सूचितः। द्वासप्ततिवर्ष-वयस्कस्य विद्वद्वर्यस्य नूतनोऽयं कथासंग्रहः पाठकानां हृदयावर्जकः सेत्स्यतीति विश्वसिमः, सहर्षं वर्धापयाम-श्चैनम्।

**कथास्तबकः - ले. डॉ. गायत्रीप्रसाद पाण्डेय, सम्पादिका डॉ. सुधा त्रिपाठी, प्रकाशक, शारदा संस्कृत, संस्थान, बी, 21/40 कमच्छा वाराणसी, पृ.सं. 120 मू. 250/-.**

नारी-स्तम्भः

# सिरीषया विमितम् अन्तरिक्षम्

❑ डॉ. राजेश्वरी भट्ट

दिवसेष्वेषु लोके सर्वत्र सम्मानिता 'सिरीषा-बान्दला' 2021 तमे ख्रिस्ताब्दे चिरादभीष्टाया अन्तरिक्षयात्रायाः सुखस्वप्नं प्रत्यक्षीकृत्य विश्वस्मिन् विश्वे प्रशस्या, प्रेरणीयाऽनुकरणीया च जाता। सिरीषा बांदला भारतभूमौ जातासु महिला अन्तरिक्षयात्रिषु द्वितीयं तथा भारतीयमूलस्य अन्तरिक्षयात्रिषु चतुर्थस्थानमधिगम्य लोके अन्तरिक्षयात्रिषु अङ्गुलिगण्या जाता। इतः पूर्वं भारतीयमूलस्य राकेश शर्मा, कल्पना चावला, सुनीता विलियम्स सदृशा विश्वविश्रुता अन्तरिक्ष-यात्रिण अस्माकं राष्ट्रस्य गौरवमवर्द्धयन्। 11 जुलाई 2011 तमे ख्रिस्ताब्दे ''मैक्सिको'' प्रदेशस्य मरुस्थलात् प्रस्थिते ध्वनेरपि तीव्रगतिना 'वर्जिन ऑर्बिट' नाम्ना अन्तरिक्षयानेन पञ्चयात्रिभिः सह श्वासान् गणयन्ती, प्राणान् करतलेकृत्वा पृथिव्या लक्षत्रयफीटम् उपरि अन्तरिक्षे होरापर्यन्तं विहरन्ती सिरीषबांदला सकुशलं भूमौ प्रत्यागत्य नवं इतिहासं विरचितवती। महद्गौरवस्य विषयोऽयं वर्तते यत् षट्सदस्यात्मकानां अन्तरिक्षयात्रिणां दले ''वर्जिन गेलेस्टिक'' इति प्रसिद्धसंस्थानस्य संस्थापकः 71 वर्षीयोऽर्बुदपतिः 'रिचर्डब्रैन्सन' स्वयमपि एकतमोऽभवत्। सिरीषा बांदला प्रतिक्षणं प्राणधातिन्या, विघ्नबाधाभिश्च दुष्कराया अन्तरिक्ष-यात्रायाः साफल्येन हर्षातिरेकमन्वभवत्। दूरदर्शनमाध्यमेन समाचारपत्रैश्च समायोजितेषु साक्षात्कारेषु शिरीषाबांदला वार्त्ताप्रसंगेषु रोमाञ्चिता अदृश्यत। सा आत्मनोऽन्तरिक्षयात्रां भव्यां, मनोरमां अतुलनीयां चिरस्मरणीयाञ्च अमन्यत।

अप्रतिहतव्यक्तित्वेन दुष्करं सुकरं कुर्वती सिरीषा बांदला 1987 तमे ख्रिस्ताब्दे आंध्रप्रदेशे गुंटूरनगरे उदारदृष्टियुते कृषकवैज्ञानिकपरिवारे जनिमलभत। सिरीषायाः पिता मुरलीधरः पुत्र्याः जन्मानन्तरं अचिरमेव आत्मनो व्यक्तित्व-कर्तृत्व-योर्विकासाय उत्तमजीवनयापनाय च अत्यल्प-वयस्कां पुत्रीं तस्याः पितामहस्य संरक्षणे समर्प्य सपत्नीकोऽमेरिकादेशे ह्यूस्टन नगरे न्यवसत्। सिरीषायाः पितामहस्यानुसारेण तस्य पौत्री अल्पवयस्येव आकाशगंगायाः शोभां अनिमेष दृष्ट्या पश्यन्ती तन्मया अदृश्यत। नातिचिरमेव पिता मुरलीधर आत्मनः पुत्रीं ह्यूस्टन नगरे आकारयत्। सम्प्रति पुत्र्याः पालनं , पोषणं, संवर्द्धनं, अध्ययनञ्च ह्यूस्टन नगर एव सम्पन्नं जातम्। उचिते संरक्षणे संततं अग्रेगच्छन्ती 'सिरीषा बाँदला' 2011 तमे वर्षे पर्ड्यू विश्व-विद्यालयात् 'एयरोनोटिकल' विषयमधिकृत्य स्नातक इति उपाधिना सम्मानिता जाता। तत उच्चाध्ययनस्य कृते 'सिरीषा' 2015 तमे वर्षे जार्जवाशिंगटन विश्वविद्यालयात् एम.बी.ए. इत्युपाधिनाऽलंकृता जाता। शिरीषा बांदलाया संवर्द्धनं ह्यूस्टन नगरेऽभवत् यत्र नासायाः 'स्पेस सेन्टर' स्थितोऽस्ति। अनेनैव 'सिरीषा' अन्तरिक्ष क्षेत्रे कार्यरतानां कार्यजातेन सर्वथा परिचिता प्रभाविता आसीत्। ततः 'सिरीषा बाँदला' अन्तरिक्षे नैपुण्य-मधिगन्तुं मतिमकरोत्। सद्य एव 2015 तमे वर्षे सिरीषा अन्तरिक्षक्षेत्रे विश्वविश्रुते 'वर्जिनगैलेस्टिक' संस्थाने कार्यरता जाता। वर्षद्वयानन्तरमेव आत्मनोऽसाधारणकौशलेन सिरीषा संस्थानस्य प्रबंधकपदे प्रतिष्ठापिता। शाणोल्लिखितमणिरिव सततं गुणगणैर्दीप्तिमती शिरीषा बॉदला सम्प्रति विश्वे विख्याताया वर्जिनगैलेस्टिक संस्थाया उपाध्यक्ष पदे कार्यरता सहैव संस्थायै समर्पिता वर्तते। गौरवस्य विषयोऽयं वर्तते यद् बाल्यादेव विदेशे वसन्ती

**शिरीषा बाँदला अधुनाऽपि स्वदेशं स्मरति। भारतीय संगीतः, साहित्यं दाक्षिणात्यव्यञ्जनानि च शिरीषायै अतीव रोचन्ते। शिरीषायाः सफलायै अन्तरिक्ष-यात्रायै निखिलं राष्ट्रं गौरवान्वितं वर्तते।**

## हिन्दी अनुवाद

इन दिनों लोक में सर्वत्र सम्मानिता सिरीषा बॉंदला 11 जुलाई 2021 को चिरकाल से अभीष्ट अन्तरिक्ष यात्रा के सुख स्वप्न को साकार कर समस्त विश्व में प्रशंसनीया प्रेरणीया तथा अनुकरणीया हो गई हैं। सिरीषा बॉंदला भारतभूमि पर जन्म लेने वाली महिला अन्तरिक्ष यात्रियों में द्वितीय तथा भारतीय मूल के अन्य अन्तरिक्ष यात्रियों में चतुर्थ स्थान प्राप्त कर अन्तरिक्षयात्रियों में अङ्गुलिगण्या है। इससे पूर्व भारतीय मूल के राकेश शर्मा, कल्पना चावला, सुनीता विलियम्स जैसे विश्वविख्यात अन्तरिक्ष यात्रियों ने भारत को गौरवान्वित किया है। 11 जुलाई 2021 ई. को 'मैक्सिको' के रेगिस्तान से ध्वनि से भी अधिकतीव्र गतिवाले वर्जिन ऑर्बिट नामक अन्तरिक्षयान के द्वारा पाँच यात्रियों के साथ सांसों को गिनती हुई, प्राण हथेली पर रखकर तीन लाख फीट ऊँचाई पर 60 मिनट तक विहार करती हुई सिरीषा बॉंदला ने सकुशल पृथ्वी पर आकर नये इतिहास की सृष्टि की। गौरव का विषय है कि छः सदस्यों वाले अन्तरिक्ष यात्रियों के इस दल में 'वर्जिन गैलेक्टिक' नामक संस्था के संस्थापक 71 वर्ष के अरबपति 'रिचर्ड ब्रेन्सन' स्वयं भी एक है। सिरीशा अपनी दुष्कर, प्रतिक्षण प्राणघातिनी, विघ्नों और बाधाओं से अतिकठिन अन्तरिक्षयात्रा की सफलता से अत्यन्त प्रसन्न है। एवं दूरदर्शन तथा समाचार पत्रों के साथ साक्षात्कार के क्रम में रोमाञ्चित होते हुए अपनी अन्तरिक्ष यात्रा को भव्य, मनोरम, अतुलनीय तथा चिरस्मरणीय बताते हुए अपना हर्ष व्यक्त किया है।

अपने अप्रतिहत व्यक्तित्व से दुष्कर को भी सुकर करने वाली 'सिरीषा बॉंदला' ने आंध्रपेदश के गुंटूर जिले में उदार चिन्तन वाले कृषक वैज्ञानिक परिवार में सन् 1987 में जन्म लिया। पुत्री के जन्म के पश्चात् शीघ्र ही शिरीषा बाँदला को दादा के संरक्षण में सौंप कर अमेरिका के ह्यूस्टन नगर में बस गए थे।

सिरीषा के पितामह के अनुसार अपनी पौत्री अल्पायु में ही आकाशगंगा की ओर एक टक दृष्टि से निहारती रहती थी एवं प्रसन्नता प्राप्त करती थी। शीघ्र ही सिरीषा बॉंदला के पिता '**मुरलीधर**' ने अपनी पुत्री को ह्यूस्टन बुला लिया। इसके पश्चात् पुत्री का पालन पोषण संवर्द्धन तथा अध्ययन ह्यूस्टन नगर में ही सम्पन्न हुआ। उचित संरक्षण में आगे बढती हुई शिरीषा बाँदला ने 2011 ई में 'एयरोनोटिकल' विषय से स्नातक परीक्षा उत्तीर्ण की। उच्चाध्ययन के क्रम में सिरीषा ने 2015 ई. में जॉर्ज वाशिंगटन विश्वविद्यालय से एम. बी.ए. उपाधि प्राप्त की। सिरीषा बाँदला का संवर्द्धन ह्यूस्टन नगर में हुआ जहाँ **स्पेस सेन्टर** स्थित है। इससे शिरीषा अन्तरिक्ष क्षेत्र में कार्य करने वालों की कार्य प्रणाली से पूर्णतः परिचित एवं प्रभावित थीं, यही कारण था कि सिरीषा बाँदला ने अन्तरिक्ष क्षेत्र की गतिविधियों में निपुणता प्राप्त करने का मानस बना लिया। तथा शीघ्र ही अन्तरिक्ष क्षेत्र में विश्वप्रसिद्ध वर्जिन गैलेक्टिक संस्था को 2015 ई. में अपना कार्यक्षेत्र चुन लिया। अपने असाधारण कार्यकौशल से दो वर्ष में ही सिरीषा की संस्था में प्रबन्धक पद पर पदोन्नति हो गई। शाणोल्लिखितमणि की भाँति निरन्तर गुणों से दीप्तिमती सिरीषा बाँदला इस समय विश्वविख्यात 'वर्जिन गैलेक्टिक' संस्था के उपाध्यक्ष के पद पर कार्यरत एवं संस्था के लिए समर्पित है। अत्यन्त गौरव का विषय है कि बचपन से ही विदेश में निवास करने वाली 'सिरीषा बाँदला' अपने देश को मन से स्मरण करती है। भारतीय संगीत, साहित्य एवं दक्षिण भारत के व्यञ्जन सिरीषा को अत्यन्त प्रिय हैं। शिरीषा बाँदला की सफलयात्रा के लिए सम्पूर्णराष्ट्र गौरवान्वित है।

**-सी-276, भाभा मार्ग, तिलकनगर, जयपुर**

आयुर्वेद-स्तम्भः

# देवनिर्मिता गुडूची रसायनी

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**वर्तमानकाले जनपदोद्ध्वंसकरः रौद्रः कोरोना-नामकः रोगः सम्पूर्णे विश्वे परिव्याप्य त्रस्तीकरोति जनान्। तेन हि भूतगणाः दाहव्यथापरीताः व्यथिताः भ्रान्ताः सन्ति। तदपरवारणार्थं स्वस्थाः जनाः निवारणार्थञ्च तद्ग्रस्ताः दुःखिताः जनाः धावन्तीत-स्ततः। क्रमेऽस्मिन् भारतवर्षे बहवः जनाः गुडूचीनामकं द्रव्यमुपयुञ्जन्ति बाहुल्येन, लाभा-न्विताश्च ते समुत्साहिताः जनानन्यानपि प्रेरयन्ति, तेन हि दुःखिताः केचिदन्य-चिकित्सापद्धत्यनुसरण-कर्तार उद्घोषयन्ति यद्धानिकारका ह्येषा गुडूची। अत्रैकवाक्यात्मकन्तु प्रत्युत्तरमिदमस्ति यन्मिथ्या-प्रचारो ह्यस्त्येषः, यतो हि देवनिर्मिता गुडूची रसायनी वर्तते, तज्ज्ञैश्च ''अमृता'' इति नाम्ना सम्बोधिता, या हि छिन्ना छिन्नाऽपि पुनः पुनः रोहत्यत एव छिन्ना, छिन्नरुहा छिन्नोद्भवा इति नामभिः विख्याता। ह्येषाऽमृतवल्लरी सञ्जीवयति जनान् रसायनगुणैश्च संयुक्तान् करोति तानेषा रसायनी नामधारिणी।**

वर्तमान काल में जनपददोद्ध्वंस करने वाला (महामारीस्वरूपक) भयंकर कोरोनानामक रोग संपूर्ण विश्व में व्याप्त होकर लोगों में त्रस्त (आतङ्कित) कर रहा है। इससे प्राणीदाह और पीड़ा से युक्त व्यथित (दुःखी) एवं भ्रान्त (घबराये हुए) हैं। स्वस्थ लोग उससे बचाव के लिए और उस से पीडित दुःखित लोग उसके निवारण के लिए इधर उधर दौड़ रहे हैं। इस क्रम में भारतवर्ष में अनेक लोग **गिलोय** नामक द्रव्य को अधिकता से प्रयुक्त कर रहे हैं। उससे लाभ प्राप्त किए हुए उत्साहित वे लोग अन्य लोगों को भी प्रेरित कर रहे हैं, इससे दुःखी होकर कुछ अन्य चिकित्सा पद्धति का अनुसरण करने वाले घोषणा कर रहे हैं कि यह गुडूची (गिलोय) हानिकारक है। यहाँ एक वाक्य में ही प्रत्युत्तर यह है कि - ''यह मिथ्या प्रचार है''। क्योंकि देवनिर्मिता गूडची रसायन का गुण प्रदान करने वाली है, इसके विशेषज्ञों के द्वारा यह **अमृता** इस नाम से संबोधित की गई है, जो बार-बार काट देने पर भी पुनः उग जाती है इसलिए छिन्ना, छिन्नरुहा, छिन्नोद्भवा इन नामों से विख्यात है। यह अमृतवल्लरी लोगों को जीवन देती है और रसायनी नाम धारण करने वाली यह उनको रसायन के गुणों से संुयुक्त करती है।

**विषयेऽस्मिन्नुल्लेखनीयमेतद्वर्तते यद्द्रव्याणि हि रसप्रधानानि वीर्यप्रधानानि च भवन्ति। यानि रसप्रधानानि भवन्ति तानि सामान्यतयाऽऽहारात्म-कानि भवन्ति यानि च वीर्यप्रधानानि भवन्ति तानि तु सामान्यतया भेषजात्मकानि भवन्ति। एतेषां द्रव्याणां प्रयोगे त्ववधानताऽऽवश्यकी वर्तते। यानि द्रव्याणि तु सर्वथा हितात्मकानि भवन्ति तान्यपि मात्राकाल-क्रियाभूमिदेह-दोषगुणान्तरम्प्राप्य तांस्तान् भावान् प्रकटयन्ति। आचार्यश्चरकः कथयति यत्-**

**मात्राकालक्रियाभूमिदेहदोषगुणान्तरम्।**
**प्राप्य तत्तद्धि दृश्यन्ते ते ते भावास्तथा तथा।।**
**तस्मात्स्वभावो निर्दिष्टस्तथामात्रादिराश्रयः।**
**तदपेक्ष्योभयं कर्म प्रयोज्यं सिद्धिमिच्छता।।**
**(च.सू. 25/46-47)**

इस विषय में यह उल्लेखनीय है कि द्रव्य रसप्रधान और वीर्यप्रधान होते हैं। जो रसप्रधान होते हैं वे सामान्यतया आहारात्मक होते हैं (आहार के रूप में लिए जाने वाले होते हैं) और जो वीर्यप्रधान होते हैं वे तो सामान्यतया भेषज के रूप में लिए जाने वाले होते हैं। इन द्रव्यों के प्रयोग में सावधानी आवश्यक होती है। जो द्रव्य जो सर्वथाहित करने वाले होते हैं वे भी मात्रा, काल, क्रिया, भूमि, देह एवं दोष के वैशिष्ट्य के कारण गुणान्तर (दूसरे गुणों को प्राप्त कर, परिवर्तित स्वरूप में) उन उन भावों को प्रकट करते हैं। आचार्य चरक कहते हैं कि-

मात्रा, काल, क्रिया, भूमि, देह एवं दोषों में गुणान्तर (भेद, परिवर्तन) को प्राप्त करके वे वे भाव उस उस प्रकार के (पथ्य या अपथ्य स्वरूप के) देखे जाते हैं, इसलिए चिकित्सा में सिद्धि को चाहने वाले चिकित्सक को चाहिए कि यहाँ जो स्वभाव (द्रव्यों के स्वभाव हितकर या अहितकर रूप में) एवं मात्रा इत्यादि आश्रयनिर्दिष्ट किए गए हैं इन दोनों को ध्यान में रख कर के ही कर्म (चिकित्सा) करना चाहिए।

**अत्र गुणान्तरशब्दो मात्रादिभिः सह सम्बध्यते, एतेन हिताहिताहाराचारास्ते हितोक्ता अपिहिताश्चा हिताश्च, तथा अहितोक्ताश्चाहिताहिताश्च, अनेन विश्लेषणेनैतत्स्पष्टम्भवति यत् प्रियाण्यपि मधुरादिरसात्मकानि द्रव्याणि कदाचिदप्रियाणि भवन्त्यप्रियाणि च तिक्तादिद्रव्याणि कदाचिन्मात्रादिभिः सम्बद्धानि हितात्मकानि भवन्ति। यथा हि-पथ्यं तावद्घृतं, तदतिमात्रमपथ्यं भवति, काले च वसन्तेऽपथ्यं, संस्कारेण च विरुद्धद्रव्यसंस्कृतमपथ्यं, भूमौ चानूपायामपथ्यम्, एव देहेऽतिस्थूले दोषे च कफेऽपथ्यम्। अपथ्यमपि विषं मात्रादिना हितं भवति, यथा रसायने- ''विषस्य तिलं दद्यात्''। एवमन्यदप्यूह्यम्।**

यहाँ गुणान्तर शब्द मात्रा इत्यादि सबके साथ संबद्ध किया जाता है अर्थात् मात्रा इत्यादि के साथ सह शब्द को लगाकर अर्थ किया जाना चाहिए, इससे वे हित और अहित आहार आचार हैं वे हितोक्त भी हितकर भी हैं और अहितकर भी हैं तथा अहित रूप में कहे गये द्रव्य अहितकार भी होते है और हितकर भी होते हैं, इस विश्लेषण से यह स्पष्ट हो जाता है कि प्रिय लगने वाले भी मधुर इत्यादि रस वाले द्रव्य कभी-कभी अप्रिय भी हो जाते हैं अर्थात् हानिकारक हो जाते हैं और अप्रिय भी तिक्त इत्यादि द्रव्य कदाचित् मात्रा इत्यादि के साथ संबद्ध होकर हितात्मक हो जाते हैं, जैसे कि घृत पथ्य ही है, वह अति मात्रा में प्रयुक्त किया गया अपथ्य हो जाता है, वसंत काल में घृत अपथ्य होता है, विरुद्ध द्रव्यों से यदि घृत को संस्कारित कर लिया जाए तो वह अपथ्य होता है, अनूप प्रदेश में (दलदल वाले प्रदेश में) वह अपथ्य होता है, अतिस्थूल शरीर में और बढे हुए कफदोष में घृत अपथ्य होता है। इसी तरह से अपथ्य भी माना जाने वाला विष मात्रा इत्यादि से यदि प्रयुक्त किया जाए तो हितकर हो जाता है जैसे कि रसायन प्रकरण में कहा गया है कि विष को तो तिल (तिल मात्रा में) देना चाहिए। इसी प्रकार से अन्य द्रव्यों के विषय में भी अनुमान करना (समझना) चाहिए।

**आयुर्वेदीयैः सिद्धान्तैः सुस्पष्टमेतद् यद्विधिविरहितस्तु हितात्मकोऽप्याहारो हानिकरो**

**भवत्येवमेव च वीर्यप्रधानानि भेषजात्मकानि द्रव्याण्यप्यविधिना प्रयुक्तान्यहितात्मकानि भवन्ति। अत एव प्रयुञ्जीताहारं विधिनियमितं भेषजमपि च। निष्कर्षरूपेण स्पष्टमेतज्जायते यद्रसायनात्मिका श्रेष्ठाप्यमृता भिषङ्ग्निर्देशेन सेवनीयाऽस्ति। यद्यप्यल्पमात्रायां कानिचिद्दिनानि यावदस्य भिषङ्ग्निर्देशं विनाऽपि प्रयोगो हानिरहित एव भवति, तर्ह्यप्यधिकगुणप्राप्त्यर्थं भिषङ्ग्निर्देशः श्रेयस्करः सुखदश्च भवति।**

आयुर्वेदीय सिद्धान्तों से यह स्पष्ट है कि विधि के बिना प्रयुक्त किया गया हितकारी आहार भी हानिकारक होता है और इसी प्रकार से वीर्यप्रधान भेषज सवरूप वाले द्रव्य भी विधि के विना यदि प्रयुक्त किए जाएं तो वे अहित स्वरूप के होते हैं। इसलिए आहार को विधिसम्मत रूप में प्रयुक्त करना चाहिए और भेषज को भी विधिविहित स्वरूप में ही प्रयुक्त किया जाना चाहिए निष्कर्ष रूप से यह स्पष्ट हो जाता है कि रसायन गुणों वाली यह श्रेष्ठ भी **अमृता** वैद्य के निर्देश से ही सेवन किए जाने योग्य होती है। यद्यपि अल्प मात्रा में कुछ दिनों तक इसका प्रयोग वैद्य के निर्देश के बिना भी यदि किया जाए तो हानिरहित ही होता है फिर भी अधिक गुणों की प्राप्ति के लिए वैद्य का निर्देश प्राप्त करना ही श्रेयस्कर होता है और सुख प्रदान करने वाला होता है।

**आयुर्वेदे हि स्वस्थस्य स्वाथ्यसंरक्षणे दिनचर्यादिपरिपालनक्रम आहारनिद्रादीनां विधिवत्सेवनं रोगग्रस्तानाञ्च रोगनिवारणक्रमे विभिन्नानामौषधद्रव्यानां विधिवत्प्रयोगो निर्दिष्टः। तत्र तु पञ्चमहाभूतानामेव महत्त्वं संस्वीकृतमायुर्वेदविद्भिर्महर्षिभिः। शीर्यति शरीरम्, एतेन स्वत एव-शीर्यमाणं शरीरं संरक्षणीयं भवति। क्रमेऽस्मिन्ने-तदुल्लेखनीयमस्ति यत्शरीरे यस्य यस्य हि तत्त्वस्य संक्षयो भवति, शरीरं तस्य तस्य हि तत्त्वस्य ग्रहणार्थं विभिन्नैर्लक्षणैरभिलाषं प्रकटयति। आचार्यः सुश्रुतः कथयति यद्-**

**दोषधातुमलक्षीणो बलक्षीणोऽपि वा नरः।**<br>**स्वयोनिवर्धनं यत्तदन्नपानं प्रकाङ्क्षति।।**<br>**यद्यदाहारजातं तु क्षीणः प्रार्थयते नरः।**<br>**तस्य तस्य स लाभे तु तं तं क्षयमपोहति।।**

**( सु.सू. 15/29-30 )**

आयुर्वेद में स्वस्थ के स्वास्थ्य के संरक्षण में दिनचर्या इत्यादि के परिपालन के क्रम में आहार-निद्रा इत्यादि का विधिवत् सेवन और रोगग्रस्त व्यक्तियों के रोग के निवारण के क्रम में विभिन्न प्रकार के औषध-द्रव्यों का विधिवत्प्रयोग निर्दिष्ट किया गया है। उनमें तो आयुर्वेदविज्ञ महर्षियों के द्वारा पञ्चमहाभूतों का ही महत्त्व स्वीकृत किया गया है। शीर्णन होता है ( निरंतर झड़ता है ) इसलिए यह शरीर है, इस से अपने आप ही शीर्णन होता हुआ यह शरीर संरक्षण के योग्य होता है। इस क्रम में यह उल्लेखनीय है कि शरीर में जिस जिस तत्त्व का क्षय होता है, शरीर उस उस तत्त्व के ग्रहण करने के लिए विभिन्न प्रकार के लक्षणों के माध्यम से अभिलाषा (इच्छा) को प्रकट करता है आचार्य सुश्रुत कहते हैं कि-

दोष, धातु अथवा मल से क्षीण या बल क्षीण भी जो व्यक्ति है वह स्वयोनि वर्धन अर्थात्दोषादि का अभिवर्धन करने वाला जो अन्नपा न है उसकी इच्छा करता है। जिस जिस आहार-द्रव्य (या आहार-समूह) की क्षीण मनुष्य

कामना करता है (खाने की इच्छा प्रकट करता है) वह उस -उस आहार विशेष को प्राप्त करने पर उस-उस अर्थात्तत्सम्बन्धी क्षय को दूर करता है।

**संक्षीणो हि स जनः यदाहारजातं प्रार्थयते तदाहारजातं गृह्णात्यपि च। तदाहारजातं तु पाञ्च-भौतिकं भवति। पञ्चभूतात्मके च देहेऽस्मिन् गृहीतः पञ्चमहाभूतात्मक आहारः पञ्चभौतिकाग्निभिः सम्यग् विपक्वः स्वान्गुणानभिवर्धयति।**

संक्षीण वह व्यक्ति जिस आहार तत्त्व की प्रार्थना करता है और उस आहार तत्त्व को ग्रहण भी करता है, वह आहार द्रव्य तो पाञ्चभौतिक होता है। पञ्चभूतात्मक इस देह में गृहीत किया गया पञ्चमहाभूतात्मक आहार पाञ्चभौतिकाग्नियों के द्वारा अच्छी प्रकार से विपक्व होता हुआ अपने गुणों को अभिवर्धित करता है।

**स्वभावतः प्रतिक्षणं शीर्यमाणं हीदं शरीरं रोगसम्बन्धात्तु नितरां शीर्यतेऽत एव तत्रापि विशिष्टस्य क्षयस्यापनयनार्थं विशिष्टानां द्रव्याणां प्रयोगः क्रियते विशेषज्ञैर्जनैः। प्रयुक्तञ्च तद्द्रव्यमपि पाञ्चभौतिकमेव भवति, कथितं ह्याचार्येण यत्- ''सर्वद्रव्यं पाञ्चभौतिकमस्मिन्नर्थे'' (चरकः) सर्वं द्रव्यमितिकार्य- द्रव्यम्, अस्मिन्नर्थे अस्मिन्प्रकरणे-ऽर्थादायुर्वेदे।**

स्वभाव से ही प्रतिक्षण शीर्यमाण यह शरीर रोग के सम्बन्ध से अर्थात् रोगयुक्त हो जाने पर तो अत्यन्त ही झड़ता है (शीर्ण होता है) इसलिए उसमें भी विशिष्ट क्षय को दूर करने के लिए विशिष्ट द्रव्यों का प्रयोग विशेषज्ञ व्यक्तियों के द्वारा किया जाता है और प्रयुक्त किया गया वह द्रव्य भी पाञ्चभौतिक ही होता है। आचार्य के द्वारा कहा गया है कि ''आयुर्वेद में सभी द्रव्य पाञ्चभौतिक हैं''।''सर्वं द्रव्यम्'' का तात्पर्य है- सभी कार्य द्रव्य और ''अस्मिन्नर्थे'' का तात्पर्य है ''इस प्रकरण में'' अर्थात् आयुर्वेद में।

**अनेनोपदेशेन नानौषधिभूतं जगति किञ्चिद्-द्रव्यमुपलभ्यते तां तां युक्तिमर्थं च तं तमभिप्रेत्य। अत एव स्वस्थावस्थायां रुग्णावस्थायामपि च पञ्चभूतात्मकानामेव द्रव्याणां ग्रहणङ्करोति जनः। द्रव्यसञ्ज्ञकेषु तेष्वाश्रयेषु गुरुलघुशीतोष्णस्निग्ध-रूक्षाद्याः गुणा भवन्ति, शरीरेऽपि च गुरुलघु-शीतोष्णादीनां संस्थितिर्भवत्यत एव तत्तद्द्रव्याणां प्रयोगेण तत्तद्गुणानामभिवर्धनम्भवति शरीरे।**

इस उपदेश से यह स्पष्ट हो जाता है कि संसार में कोई भी द्रव्य उस उस युक्ति और उस उस अर्थ को (अभिप्राय को या उद्देश्य को) प्राप्त करके अनौषधिभूत रूप से अर्थात् जो औषधि नहीं हो ऐसे रूप में प्राप्त नहीं होता है। इसलिए व्यक्ति स्वस्थावस्था में और रुग्णावस्था में भी पञ्चभूतात्मक द्रव्यों का ही ग्रहण करता है। द्रव्यसंज्ञक उन आश्रयों में अर्थात् द्रव्यों में गुरुलघु शीतोष्णादि गुणों की स्थिति होती है, इसलिए उन उन द्रव्यों के प्रयोग से उन उन गुणों का शरीर में अभिवर्धन होता है।

**यद्यप्यायुर्वेदचतुर्विंशतिकः पुरुषः पञ्चविंशति-तत्त्वमयो वा पुरुषः दर्शनशास्त्रवदेव स्वीकृतः तथाप्येषस्तु सांख्यदर्शनपरिगृहीतश्चिकित्साशास्त्र विषयः पुरुषो नास्ति, चिकित्साशास्त्रविषयः पुरुषस्तु षड्धातुक एव पुरुषोऽस्ति, अत एवाचार्यः कथयति, यत्-खादयश्चेतनाषष्ठा धातवः पुरुषः**

**स्मृतः। अत्र खादयः ''खं वायुरग्निरापः क्षितिस्तथा'' इति, चेतनाषष्ठा इत्यत्र चेतनाशब्देन चेतनाधारः समनस्क आत्मा गृह्यते, खादिग्रहणेन चेन्द्रियाणि खादिमयान्यवरुद्धानि।**

यद्यपि आयुर्वेद में चतुर्विंशतिक पुरुष अथवा पञ्चविंशतितत्त्वमय पुरुष दर्शनशास्त्र के समान ही स्वीकृत किया गया है फिर भी सांख्य दर्शन परिगृहीत पुरुष (पञ्च विशतितत्त्वमय) तो चिकित्साशास्त्र का विषय नहीं है, चिकित्साशास्त्र का विषयस्वरूपक पुरुष तो षड्धात्वात्मक पुरुष ही है। इसलिए आचार्य कहते हैं कि- खादि आकाश, वायु, अग्नि, जल एवं पृथ्वी ये हैं, और छठी चेतना धातु इसमें यहाँ **चेतना शब्द से चेतना का आधार मनसहित आत्मा को ग्रहण किया जाता है,** खादि के ग्रहण करने से खादियुक्त अर्थात् पाञ्चभौतिक इन्द्रियाँ भी इसमें गृहीत हो गई हैं।

**गुडूचीनामकं द्रव्यमपि पाञ्चभौतिकमस्ति, गुडूची कटुका तिक्ता स्वादुपाका रसायनी भवति। यैराधुनिकैः शोधनिरतैश्चिकित्सकैः तथाकथित-शोधमाध्यमेन निर्णयः प्रकाशितस्ते त्वायुर्वेदीय-द्रव्याणां शरीरस्य च पाञ्चभौतिकतां न जानन्ति, न च गुरुलघुशीतोष्णादिभिरभिज्ञाः सन्ति। द्रव्याणां रसगुणवीर्यविपाकादीनां स्वरूपमपि ते न जानन्ति, अत एव तेषां परिणामकथने ते कथं समर्थाः सन्ति? यतो हि त आयुर्वेदीयानां द्रव्याणां संयोगप्रभावमेव न जानन्ति, न च द्रव्याण्यधिकृत्य प्रयोज्यानां हिताहितात्मकानां पथ्यापथ्यादीनां ज्ञानं तेषां समीपे वर्ततेऽतस्ते भेषजात्मकानामायुर्वेदीयद्रव्याणां हिताहितकथनेऽधिकृता एव न, न च सिद्धान्तानुमत-निर्णयकरणे ते समर्थाः सन्ति। आयुर्वेदीय सिद्धान्तानां संस्थापने तु सुनिश्चितो विधिर्निर्दिष्ट आचार्येण।**

गुडूची नामक द्रव्य भी पाञ्चभौतिक ही है, गुडूची कटु एवं तिक्तरस वाली तथा स्वादुपाक वाली एवं रसायन गुणों वाली होती है। वीर्य में तो उष्ण यह तृषा (प्यास) दाह, प्रमेह और कास इन रोगों को नष्ट करती है, उष्ण होते हुए भी यह तृषा का (प्यास) का शमन करने वाली और दाह का प्रशमन करने वाली होती है। शोध प्रक्रिया में लगे हुए जिन आधुनिक चिकित्सकों के द्वारा तथा कथित शोध के माध्यम से निर्णय प्रकाशित किया गया है वे आयुर्वेद के द्रव्यों की और शरीर की पाञ्चभौतिकता को नहीं जानते हैं और गुरुलघुशीतोष्णादि से भी वे परिचित नहीं हैं। द्रव्यों के रस-गुण-वीर्य-विपाकादि के स्वरूप को भी वे नहीं जानते, इसलिए उनके परिणामकथन में वे कैसे समर्थ हो सकते हैं, क्योंकि वे आयुर्वेद के द्रव्यों के संयोग प्रभाव को भी नहीं जानते हैं तथा द्रव्यों को अधिकृत करके (ध्यान में रखकर) प्रयुक्त किए जाने वाले हितात्मक एवं अहितात्मक स्वरूप और अपथ्य स्वरूप इत्यादि का ज्ञान उनके पास में नहीं है, इसलिए वे भेषज के रूप में काम में आने वाले आयुर्वेद के द्रव्यों के हित एवं अहित के कहने में अधिकृत ही नहीं हैं और सिद्धान्तानुमत निर्णय करने में समर्थ भी नहीं है। आयुर्वेद के सिद्धान्तों की स्थापना में तो एक निश्चित विधि आचार्य के द्वारा निर्दिष्ट की गई है।

**यथा-**

**अथ सिद्धान्तः- सिद्धान्तो नाम स यः परीक्षकैर्बहुविधं परीक्ष्य हेतुभिश्च साधयित्वा स्थाप्यते निर्णयः।**

**स चतुर्विधः- सर्वतन्त्रसिद्धान्तः, प्रतितन्त्रसिद्धान्तः, अधिकरणसिद्धान्तः, अभ्युपगमसिद्धान्तश्चेति।( च.वि. 8/37 )**

**सिद्धान्त -**

जो परीक्षकों के द्वारा अनेक प्रकार के परीक्षण करके अन्य हेतुओं के द्वारा सिद्ध करके जो निर्णय स्थापित किया जाता है उसे सिद्धान्त कहते हैं। वह चार प्रकार का होता है-

सर्वतन्त्रसिद्धान्त, प्रतितन्त्रसिद्धान्त, अधिकरणसिद्धान्त, अभ्युपगमसिद्धान्त।

**अत्र परीक्षकैर्बहुविधं परीक्ष्य इति यत्कथितं तेन त्वाचार्यः सङ्केतयति यदन्येषामपि बहूनां विधीनां साहाय्यं परीक्षणमाध्यमेन सिद्धान्तसंस्थापने आवश्यकं वर्तते। अत एवाधुनिकैः कैश्चिच्चिकित्सकैर्यः निर्णयः प्रकाशितः स तु पूर्णतः मिथ्याऽस्ति। तैः कथितं यद्गुडूची यकृद्विकृतिं करोति, आचार्यास्तु कथयन्ति यदमृता पाण्डुरोगं कामलाञ्च निराकरोति, विकारौ त्वेतौ यकृत्सम्बन्धिनावेव स्तः, अतः यकृद्विकृतिनाशिकैषा गुडूची कथं स्वगुणान् परित्यज्य विपरीतात्मिकां यकृद्विकृतिं करिष्यतीति।**

यहाँ पर 'परीक्षकैर्बहुविधं परीक्ष्य' (परीक्षकों के द्वारा अनेक प्रकार से परीक्षण करके) यह जो कहा गया है उससे तो आचार्य यह संकेत करते हैं कि परीक्षण के माध्यम से सिद्धान्त की स्थापना करने में अन्य अनेक विधियों की सहायता आवश्यक होती है। इसलिए आधुनिक किन्हीं चिकित्सकों के द्वारा जो निर्णय प्रकाशित किया गया है वह तो पूर्णरूपेण मिथ्या है। उनके द्वारा कहा गया है कि गुडूची यकृत् की विकृति को करती है। आचार्य तो कहते हैं कि **अमृता** पांडुरोग और कामला को दूर करती है, ये दोनों विकार तो यकृत् से सम्बंधित ही हैं, इसलिए यकृत् के विकार का नाश करने वाली यह **गुडूची ( गिलोय )** अपने गुणों को छोड़कर विपरीत स्वरूप की यकृत् विकृति को कैसे करेगी।

**अन्यान्यपि बहूनि प्रमाणान्यायुर्वेदशास्त्रे सन्ति यैरपार्थकं कर्तुं शक्नुवन्त्यायुर्वेदज्ञाः शोधनिष्कर्षमेनम्, किन्तु तेषामत्र समुल्लेखस्यावश्यकतैव नास्ति। अत्र त्वेतत्कथनमेव पर्याप्तमस्ति यत् संशयं परित्यज्य रसायनस्वरूपात्मिकामिमाममृतां यथाकामं प्रयोजयेत्, किन्तु समुचितं हानिरहितं लाभप्राप्त्यर्थं भिषङ्निर्देशस्त्वपरिहार्य एव। भिषङ्निर्देशं विना तु न कस्यचिदपि भेषजात्मकस्य द्रव्यस्य प्रयोगो विधेयः।**

अन्य भी बहुत से प्रमाण आयुर्वेदशास्त्र में हैं, जिनके द्वारा इस शोध के निष्कर्ष को आयुर्वेदज्ञ निरर्थक ( बेकार, गलत) किन्तु यहाँ उनके उल्लेख की आवश्यकता ही नहीं है। यहाँ तो इतना करना ही पर्याप्त है कि संशय को छोड़कर रसायनस्वरूप वाली इस अमृता को जितनी आवश्यकता हो उसके अनुसार प्रयुक्त किया जाना चाहिए, लेकिन समुचित हानिरहित लाभ की प्राप्ति के लिए वैद्य का निर्देश अपरिहार्य है अर्थात् आवश्यक रूप से वैद्य का परामर्श ले ही लेना चाहिए। भिषक् के निर्देश के विना तो किसी भी भेषजस्वरूपक द्रव्य का प्रयोग नहीं करना चाहिए।

**80, सेनापति हाउस के पीछे**
**प्रेमनगरम्, झोटवाड़ा, जयपुरम्**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/405/2021-23

हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## एस्बेस्टोस सीमेन्ट पाइप्स

**सस्ता, मजबूत एवं टिकाऊ**

सर्वोत्तम 'माजा' तकनीक द्वारा निर्मित पेयजल, कृषि, बोरवैल, सीवरेज
एवं ड्रेनेज में उपयोगी तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ

**एवं**

निर्माता

## एस्बेस्टोस सीमेन्ट शीट्स

## छत एक, लाभ अनेक

**उच्च गुणवत्ता की फाइबर सीमेन्ट की नालीदार चादरें**

कारखाना : हमीरगढ़ - 311025, जिला भीलवाड़ा (राजस्थान) दूरभाष: 01482-286102-07
दिल्ली कार्यालय : ए-९ए, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26961849/26965673
जयपुर कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, जयपुर-302001 फोन: 0141-4019691/2370566
ईमेल आईडी : jaipur@kanoria.org (Pipe Dn.), sharma.ashok@kanoria.org (Sheet Dn.)

# राष्ट्रीय विचारों के लिए पढ़ें

(हिन्दी) साप्ताहिक
**पाञ्चजन्य**

(English) Weekly
**ORGANISER**

हमारी विशेषताएं



- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा



You can subscribe Panchjanya/Organiser Weeklies online through our
Websites: www.panchjanya.com, www.organiser.org

**वार्षिक ग्राहक शुल्क**

भारत में ₹ 700/- पाञ्चजन्य • ₹ 800/- ORGANISER (साधारण डाक द्वारा)
विदेशों में $ 80 (विदेशों में हवाई डाक द्वारा)

**प्रसार विभाग**
**भारत प्रकाशन (दिल्ली) लिमिटेड**
2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली- 110055
फोन : 011-47642000,01,02, ई-मेल: circ@bpdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम्
अध्यक्षः शंकरप्रसादशुक्लः प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम्
दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–15, न्यू कॉलोनी, जयपुरम्–३०२००१ • दूरभाषः ०१४१–२३७९०१४

प्रतिष्ठायाम्,